DrillBit

The Report is Generated by DrillBit Plagiarism Detection Software

***Selected Language*** Sanskrit

### ***Submission Information***

| | |
|---|---|
| Author Name | SKT |
| Title | SKT - ELM |
| Paper/Submission ID | 2115533 |
| Submitted by | coe@kanchiuniv.ac.in |
| Submission Date | 2024-07-15 11:25:31 |
| Document type | Thesis |

### ***Result Information***

| | |
|---|---|
| Similarity | **2%** |

A Unique QR Code use to View/Download/Share Pdf File

**DrillBit Similarity Report**

| 2 | 2 | A | A-Satisfactory (0-10%)<br>B-Upgrade (11-40%)<br>C-Poor (41-60%)<br>D-Unacceptable (61-100%) |
|---|---|---|---|
| SIMILARITY % | MATCHED SOURCES | GRADE | |

| LOCATION | MATCHED DOMAIN | % | SOURCE TYPE |
|---|---|---|---|
| 1 | sa.wikipedia.org | 2 | Internet Data |
| 2 | Thesis Submitted to Shodhganga, shodhganga.inflibnet.ac.in | <1 | Publication |

श्ुभाभिनन्दनानि संसकृतवाञ्याध्ययननिरतानां समेषां विद्याथिनां श्रीचन्द्ररोखरेनद्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन
सच्चाल्यमाने दूरविद्यकेन्द्रं भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राट्यमूल्याङ्कनप्रत्यायनपरिषदा() ^^) “^श्रण्यां
प्रमाणीकृतः एवं विश्वविद्यायानुदानायोगेन (10) सद्घटनेन दूरविदयकेन्द्रतवेन अनुमतः वर्तते। विश्वमहाविद्यालयोऽयं १९९३ वरे
भारतसर्वकारद्रारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षत्रे तथा परिदोधनकार्यै च महतीं समुन्नत प्रर्शवन् वर्धमानः अस्ति।
भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य स्ार्द्गीनविकासाय तथा लोकपरिरक्षणाय
च ज्ञानगङ्गा निरन्तरतया प्रवाहयति। नैकानि शाखाणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्शनानि,
अष्टादशपुराणानि, इतिहासो, धर्मशाखं, काव्यानि, चतुःषष्िकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य
मार्गदर्शनं करोति। प्रकृतेऽस्मिन् काले पाश्ात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः हासतामेति।
आधुनिकविन्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाख्यं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम्
अनुभवे आचरणे च विद्यामाना योगविदा प्रपञ्चे सर्वैरपि आद्रियमाना द्दर्यते। एवम् आयुर्वदाद्यः अपि। अतः अधुनातनविज्ञानेन
साकं प्राचीनविज्ञानस्य संयोजनदारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाश्ची कामकोटिपीठाधिपेः प्राचीन-नवीन
विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।
श्रीचन्द्ररोखरेनद्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राजगने बहुविधाः विद्याः वोधयन् दूरस्थानां जिज्ञासूनामपि छाभाय केन्द्रमिद्
प्रचालयति। एतत् दारा विद्यार्थिनः लाभं लभन्तामिति आशास्मटे। छ८ट तावात्लान अं लागाताक्छल्तावालाताच्ञवाक्डपवत एज
भवावणतगनफेव एवाप, [(वालाएपागा (०९८०३ ८०८०९ (०३ ८०८०९ (०३ ८०८०९ (०३ ‰८( द् रघुवंशमहाकाव्यम् (चतुर्थः
सगः) (० ‰८ (०९ ‰८० ८०२८००२ ‰ (०९ ‰८ (०३ ८०८०२ ८००२ ‰८ (रे रघुवंशम्.चतुः सरमः पाल्यपरिचयः पत्रमिदं
कविकुलगुरोः कालिदासस्य कृति छात्रेभ्यो परिचाययति। महाकव्यप्रप्चः सकलवाञ्ययमोलिभूतः इति सर्वविदितोऽयं विषयः।
तत्रापि अतिविशिष्टा कालिदासकृतिः। तत्र रघुवंशमहाकाव्यं लघुद्ययीति प्रथिते अन्धद्वये अन्यतरत्। इदञ्च काव्यं
स्रातककक्यायां महाकाव्यदोली बोधयित्वा पौराणिकीं कथामपि परिचाययति। रघोः गुणाः निर्वहणडाक्तिः तथा पराक्रमश्चेति
इमे विषयाः नायकस्य सर्वोत्कर्षं तथा कवेः काव्यचातुरीच् व्यञ्जयन्ति प्रथमः खण्डः - कविपरिचयः, काव्यपरिचयः, रघोः
राज्यप्ा्तिः अस्मिन् खण्डे कालिदासस्य परिचयः रघुवंशमहाकाव्यस्य परिचयः तथा चतुर्थसर्गस्य अष्टौ शकाश्च विमृष्टाः।
कालिदासस्य देशकालकृतिपरिचयः रघुवंशमहाकाव्यस्य सर्गाणां सङ्गः तथा अष्टानां शोकानां विवरणमत्र विहितम्। रघोः
राज्यप्राप्तिः, शत्रूणाम् भीतिः, प्रजानाम् मोदः, राज्यशासनम्, वैदुष्यम्, एकचक्रवतित्वम् इत्येते विषयाः वर्णिताः। दवितीयः
खण्डः -रघोयराः अस्मिन् खण्डे रघोः पूर्वपुरुषापेक्षया प्रजापालनम्, नयवेदित्वम्, भूतानाम् उत्कर्षः, राजपदसार्थक्यम्,
शाखचक्ुस्मतत्वम, योव्याप्ि:, जेत्रयात्रायै धनुर्धारणम्, शरदतुप्रापतिः, योविस्तारः, यात्रायाः नीराजनम्, प्रजानां नीराजनम्
इत्येते विषयाः वर्णिताः तृतीयः खण्डः - रघोः जैत्रयात्रारम्भः अस्मिन् खण्डे रघोः जत्रयात्रारम्भः, सेनाप्रस्थानम्, सेनायाः
चतुस्स्कन्धत्वम्, अटवीनां विच्छेदः, नायकत्वेन सेनानयनम्, मार्गस्य उल्वणीकरणम्, सुद्यानां जयः, वङ्गानां जयः, तेषाम्
उत्खातप्रतिरोपणम्, ॥ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः कलिङ्गाभिमुखगमनम्, महेन्द्रजयः,
कलिद्गजयः, दक्षिणाशागमनम्, काविरीप्रा्तिः, मलयाद्रिप्रा्तिः, पाण्ड्यानां जयः इत्येते विषयाः वणिताः। चतुरैः खण्डः - रघोः
दङ्षिणपश्चिमजैत्रयात्रा अस्मिन् खण्डे रघोः ताम्रप्ण्या मुक्तपापः, मलयददरपरापतिः, सद्यपर्वतलद्रनम्, केरलजयः,
मुरत्मलब्ानम्, युद्धम, अपरान्तदेशप्रापनिः, त्रिकूटपर्वतपरा्तिः, पारसीकं प्रति प्रस्थानम्, यवनानां जयः, यवनसेनानाशः इत्येते
विषयाः वर्णिताः पञ्चमः खण्डः - रघोः उत्तदिग्यात्र अस्मिन् खण्डे रघोः उत्तरदिशि जैत्रयात्रा, सिन्धुतीरे पराक्रमः, काम्बोजजयः,
कैखासगमनम्, गङ्गाप्राप्ि:, पार्वतीयानां जयः, तुहिनाद्रिगमनम्, कामरूपजयः, विश्वजियज्ञारम्भः इत्येते विषयाः सकोशलं
वर्णिताः । महाकाव्यस्य दलं बोधयन्, रघोः गुणगणान् वर्णयन्, शब्दधातुजञान प्रापयन् काव्यखण्डोऽं छात्रेभ्यः निधिमिव
प्रयच्छति। विविधशब्द्जालमण्डितोऽयं काव्यखण्डः सर्वद्गीणतया भाषावेदुषं व्युत्पाद्यति। #
श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुर्थः सर्गः क विषयः पुटसह्या | मथमः | परिचयः 1-15 कविपरिचयः
काव्यपरिचयः रघोः राज्यप्राप्ि: दवितीयः | रघोंशः 16-29 रघोऽराज्यपरा्तिः प्रजाभिरञ्जनम् राज्यनिर्वहणम् यञशोविस्तारः
तृतीयः | रघोः जैत्रयात्रारम्भः 30-43 जेत्रयात्रारम्भः, सेनाप्रस्थानम्, सेनायाः चतुस्स्कन्धत्वम् अटवीनां विच्छेद्ः, नायकत्वेन
सेनानयनम्, मार्गस्य उल्वणीकरणम् सुह्यानां जयः, वङ्गानां जयः, तेषाम् उत्लातप्रतिरोपणम् कलिन्नाभिमुखगमनम्, महेन्द्रजयः,
कलिङ्गजयः चतुर्थः | रघोः दक्षिणपश्चिमजैत्रयात्रा 44-57 रघोः ताम्रपण्यौ मुकतप्राधतिः, मख्यद्ुरपाधिः, सदयपर्वतलद्रम्
केरखजयः, मुरलालब्द्रनम्, युद्धम्, अपरान्तदेशप्रापतः, ्िकूटपर्वतप्राधिः 9 श्रीचनदरदोखरेत्रसरस्वतीविश्वमहाविद्यालयः
रघुवंशम्.चतुर्थः सर्गः पारसीकं प्रति प्रस्थानम्, यवनानां जयः, यवनसेनानाराः पञ्चमः | रघोः उत्तदिग्यात्रा 58-74 उत्तरदिशि
जैत्रयात्रा, सिन्धुतीरे पराक्रमः, काम्बोजजयः कैलासगमनम, गङ्गप्रापतिः, पार्वतीयानां जयः तुहिनाद्रिगमनम्, कामरूपजयः,
विश्वजियज्ञारम्भः श्रीचनदरदोखरेत्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम.चतुर्थः सर्गः प्रथमः खण्डः - कविपरिचयः,
काव्यपरिचयः, रघोः राज्यप्रापतिः पाठसंर्वना 1. प्रस्तावना 2. उदेश्यम् 3. चतुरथसर्गस्य सारांशः 4. चतुर्थसर्गस्य

प्रथमशटोकादारभ्य अष्टाविहातिश्ठोकपर्यन्तभागः (शोकः, पदच्छेदः, अन्वयः, तात्पर्यम्) . वोधप्राः . शब्दावली . सारांशः . अभ्यासप्रश्नाः . संदर्भगन्थसूची 10.सहायकग्रन्थसुची © @ ~ > छर प्रस्तावना रघुवंशम् एकं महाकाव्यम् अस्ति। यस्मिन् एकोनविशतिसरगास्सन्ति । अयं ग्रन्थः काव्यस्य दर्शनस्य च सुन्दरं समन्वयं प्रस्तोति ।वीररसप्रधानम् इदं काव्यम्।अस्मिन् पा्यांशेरघुवंशमहाकाव्यस्य चतुर्थः †, निरि । रघु ५ ि १ सगः :। रघुवशमहाकाव्यस्य चतुथः सगः भाषाटृष्या व्युत्पाद्कः शब्दसंवर्धकश्चास्ति । गुरुणा दत्तं राज्यमवाप्य रघोः देश्यं कीटशमासीदिति अस्मिन् पाठ्यांशो अस्माभिः पठ्यते। ॥ श्रीचनदरदोखरेत्रसरस्वतीविश्चमहाविद्यालयः रघुवंशम.चतुर्थः सर्गः १, महाकाव्यदोलीज्ञानम् २. रघोः गुणानां ज्ञानम् ३. कालिदासस्य काव्यदोलीज्ञानम् ४. नूतनानां शब्दानां ज्ञानम् ५. वाक्यरचनाकोशलसंपादनम् ६. पोराणिकेतिहासस्य ज्ञानम् चतुरथसर्गस्य सारांशः-सूववंशोद्धतेन राज्ञा दिलीपपत्रेण रघुना राज्यारोदणं कृत्वा ताटशं शासनं चकार येन “राजा” इति शव्दः सार्थकः जातः। महाकविना कालिदासेनरघुवंशमहाकाव्यस्य चतुर्थे सगे राज्याधिरोहणस्य दिग्विजियस्य च विस्तृतं विवरणं कृतम्। कालिदासस्य परिचयः कालिदासः महाकविः वतंते। सः कविकुलगुरुः इति प्रसिद्धः। रेतिद्यानुसारं सः विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीत्। तस्य नाम काल्याः दासः इति समासात् व्युत्पद्ते। कालिदासः रघुवंशं, कुमारसंभव, मेघदूतम् खण्डकाव्यं च इति त्रीणि श्रव्यकाव्यानि रचितवान् । अभिज्ञानशाकुन्तल, विक्रमोर्वीरियां, मालविकाभनिमित्रं च इति त्रीणि दृश्यकाव्यानि अपि निर्मितवान् । केचन जनाः मन्यन्ते यत् सः ऋतुसंहारः इति काव्यं श्यामलाष्टकादीनि काव्यानि अपि रचितवान् । केचन जनाः कालिदासत्रितवस्य विषये अपि वदन्ति । # श्रीचनदरदोखरेत्रसरस्वतीविश्चमहाविद्यालयः रघुवंशम्.चतुः सरमः कालिदासस्य जीवनम् कालिदासो हि परम्परासमर्थको भारतीय आसीदु,यो हि सनातने धर्मे मनागपि परिवर्तनं वोपेक्षणं नैव सहते। तेनैव सोऽभिज्ञानशाकुन्तलस्य मङ्गलाचरणपये बोद्धसम्मतनिरीश्वरवादनिरासाय प्रत्यक्षाभिः परपननस्तनूमिः' इति कथयति ।स तु देवत्रयस्यैकान्तेक्यं समर्थयति । यथा मङ्गलप्ये दिवः कुमारसम्भवे (र सर्गे ) बरह्मा, रघवो (१० सर्गे), विष्णुश्च स्तुताः सन्ति । प्रत्यभिज्ञावादी स साह्ययोगावपि तथैवाद्रियते । वेदेषु परमश्रद्धा, पुनर्जन्मवादः, ईश्वरस्य जगत्मणोतृत्वश्च कालिदासस्य जीवनदरनस्य केचित्पक्षाः । क्वेः देशः कालिदासस्य जीवनवृत्तिविषये बहुविधाः ोकविश्रुतयः अनेके वादाः अपि सन्ति । केचित् एनं विक्रमादित्यस्य सभायां कविः इति आमनन्ति । केचित् गुप्तकालीननरेशाणाम् आश्रयं प्राप्तवानिति कथयन्ति । धारानगरे भोजराजस्य सभायां कविरल्पदभूषितः अभूत् इति कथाकोविदाः वद्न्ति। रेतिद्यानुसारं बाल्यकाले सः अतीव मूर्खः अवर्तत । विद्याधरया सह तस्य विवाहः अभवत् । ततः काकिदासः कालीदेव्याः वरप्रसादेन विदान् अभवत् इति । इयं कथा कालिदासस्य प्रतिभया कविताचातुर्येण अपि जाता तथ्या तु न इति विदुषां मतिः । मेघदूते अन्यासु कृतिषु सः पुनःपुनः उजयिन्याः सौन्दर्यं वर्णितवान् अतः सः तत्रैव बहुकालम् उषितवान् स्यात् । कारमीरे प्रवर्धमानस्य केसरपुष्पं सः केवलं वणितवान् इत्यतः काइमीरीयः स्यादिति केषाञ्चित् अभिप्रायः । तेन मेघदूते निदः रामगिरिः विदर्भे भवति । रघुवंशमहाकाव्ये तेन वर्णितं रघोः दिग्विजयं सृक्ष्मतया परिशीलयामश्चेत् भारते तस्य अपरिचितः प्रदेशः नास्तीति स्पष्टं ज्ञायते । यथा असमप्रदेशम् अवर्णयत् तथैव मनोहरशल्या केरलमपि अवर्णयत् । हिमालयमिव समुद्रतीरमपि सुन्दरम् अवर्णयत् । अतः सः राषट्कविः, उजयिनी तस्य स्थिरस्थानम्, समग्रभारतं तस्य चरस्थानम्, अतः समग्रभारतमेव तस्य प्रदेशः इत्यपि वक्तुं शक्यते । ॥ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः कालः आभारतीया भारतीया वा कविवरमिमं नवीनतमं प्राचीनतमं वा कल्पयन्तु नाम, किन्तु अस्य कृतिभिः एतस्य स्थायि यशः न मनागपि हीयते। अस्य कालविषये तु प्राधान्येन। १ तत्र प्रथमं क्रिस्ताब्दतः पूर्व प्रथमशतान्याम्। २. दवितीयं क्रिस्ताब्दतः पश्चात् पञ्चमरतान्याम्। ३ तृतीयं क्रिस्ताब्दतः पश्चात् षष्ठशतान्याम्। तृतीयस्य प्रवर्तकः फर्गुसनमहोदयः आसीत्। एतस्य कथनम् भवति यत् ५४४ किस्ताब्दे विक्रमादित्यपद्लाञ्छनेन केनापि राज्ञा द्रणाः विजिता। मतमिदं मैक्समुलरः अपि स्वीकरोति । डा. हार्नलीमहोदयः कथयति यत् महाकवेः कालिदासस्य आश्रयदाता यशोधर्मानृपतिः षष्ठ शतान्याम् आसीत्। अनेन कविना तस्य यातरावर्णनव्याजेन रघोः दिग्विजययात्रा वर्णिता इति। कालिदासो हि रघुवंशे षष्ठसगँ इन्दुमतीस्वयंवरपसङ्गे राजवर्णनक्रमे प्रथमं मगधेश्वरमेव गृह्णति वर्णयति अपि तदुत्कषं यथा स मागध एव स्वात्, किन्तु तत्सम्मतः परन्तपो नाम मागधो राजा न कुत्रापि पुराणेष्वपि श्रूयते। रघुवंशे एवं चतुर्थस्गे मगधं वा पुष्पपुरं पुननांमतोऽपि न स्मरति। स हि माटविकाभनिमित्रे विदर्भान् टि द्ार्णानामधीनस्थराज्यत्वेन वर्णयति यत्र हि यज्ञसेनमाधवसेनयोः दैराज्यं स्थापितमस्ति रघुवंशे तु 'सौराषटरम्यानपरो विदर्भान इति पृथगेव स्वतन््राज्यरूपेण स विदर्भान स्मरति। अपरच्च, अभिमित्रसमये साकेतप्देश्यो मगधानामन्तवर्िप्रदेश आसीत्। रघुवंशे तु स साम्राज्यकेन्दरत्वेन वर्णितोऽस्ति। तेन टि रघुवंशस्य प्रणेता कालिदासोऽभिमित्रसमकालिक इति नैव सर्वतोभावेन सङ्गच्छते। रससिद्धस्य अस्य कवीश्वरस्य महिमा तदीयकाव्यैः एव ज्ञायते । तस्य काव्यस्य परिशीलनेन वेदशञाखपुराणेषु तस्य अगाधं पाण्डित्यम् आसीत् इति ज्ञायते । कल्पनाचातुर्यं पदानां माधुर्य, पात्रसंविधाननेपुण्यं, रसोसः, ललितानि मनोहराणि वचनानि इत्यादिभिः सुगुणैः अस्य कवेः काव्यानि सर्वजनाद्रणीयानि । कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः कविरिति सुधीभिः पुरस्कृतः । अस्य रचनाः ४ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः चतुव्गपुरुषार्थानां प्रदानसाधनस्वरूपाः इत्यपि स्वीकृतं सरसान्तःकरणैः संख्यावद्धिः । अयं महाकविः वेदभीरीतेः सम्राट्, प्रसादगुणपरिपर्णेः,

अनुपमोपमाप्रयोगप्रजापतिः प्रकृतिचित्रणचित्रकारः, व्यञ्जनाव्यञ्जितशाखकलेवरः, अभिनवकल्पनाकुशलः, अन्यतमः काव्यशिल्पी विराजते - सभाभास्वरो भास्करः, वाणीवरदवत्सः, भूमातुर्मौलिमुकुटदीरकः, धन्योऽयं कविमूर्धन्यः, स्वकीयकुलकेतनः, सर्वतन्त्रस्वतन्त्रः, सकलशाखासारनिश्यन्दः, काव्यकोशाविकासविभाकरः, वैदर्भीरीतिसभाजनसभ्यः, प्रसादगुणालम्बनः, उपमासीमन्तिनी-सीमन्तसिन्धूरदानसरसः, कविताकामिनीविलासः, काव्यरचनाविक्रमादित्यः, श्रीविक्रमादित्य कविकादम्बकदम्बसमाराधितपादपद्मः, मुकुटालङ्करणारहितोऽपि सार्वभोमः, कविकुलगुरुः, कविचक्रवर्ती, प्रकृतिनरीनिर्वचनचतुरः विदयोत्तमाय्ोतितान्तःकरणः, समचितकालिकाचरणः, व्यासवाल्मीकिप्रमृतीनाम् अवरजः, विश्वविश्रुतकीर्तिः आसीत् महाकविः कालिदासो नाम । रघुवंशमहाकाव्यपरिचयः रघुवंशमहाकाव्यं कालिदासेन विरचितं प्रसिद्धं महाकाव्यम् भवति। तत् एकोनविं्तिसर्गैः युतं लालित्यपर्णं महाकाव्यम्। रघुवंशस्य कथावस्तु सूर्यवंशस्य राज्ञा वर्णनाधारितम् विद्यते। दहामसगौदारभ्य पञ्चद्यसर्गपर्यन्तं रामस्य कथा वणिता विद्ते। तदुत्तरं रामवंश्यानां तत्तन्नृपाणां चरितानि उपन्यस्तानि। चरमः सर्गः अग्निवर्णस्य गर्भवत्याः महाराजाः शासनाचरणेन समं समाप्यते। कालिदासः अभिवर्णपरवर्तिनां राज्ञाम् अपि वर्णनं चिकीर्षति स्म, परम् असो कालेन कवलीकृतः इति किंवदन्ती। तथा अपि कालिदासेन परतः अपि रघुवंशस्य सर्गाः लिखिताः; परन्तु ते न प्राप्यन्ते इत्यपि प्रसिद्धिः । रघुवंहो येषां राजज्ञां वर्णनानि सन्ति, तेषां रामायणव्ितनृपैः साकं भेदः आपतति, परन्तु वायुपुराण-वर्णितानुसारं रामवंशावल्या साकं रघुवंशवर्णित-वंशावली भूयसा सामञ्जस्यं धारयति। | "| श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः रघुवंशं सूर्यकुलोत्पन्नानां भूपतीनां चरितकथनात्मकं वर्तते। दिलीपपुत्रस्य रघोनाभ्ना सकल एव सूर्यवंशो रघुवंश इति ख्याति गतः। सूरयवंशस्य रघुनाम्ना प्रसिद्धेः कारणं महाकविकालिदासः वर्णयति यत्, ततः समानीय स मानितार्थी हस्तौ स्वहस्ताजितवीरशव्दः। वंशस्य कत्तीरमनन्तकीर्ति सुदक्षिणायां तनयं ययाचे। । इति। महाकाव्यस्य लक्षणानुसारं यानि लक्षणानि आवर्यकतानि, तानि रघुवंश द्रीदृशयन्ते। महाकाव्यस्य लक्षणानुसारम् अस्मिन् रघुवंशे एककुलोत्पनाः वहवः पृथ्वीपालः वर्णिताः। अस्मिन् अङ्गी वीरो रसः। शङ्गार-करुण-शान्ताद्यः रसाः, नाटकस्य सन्धयः अपि अङ्गानि यथास्थाने विहिताः। इदं अपि रामायणादिरूपाम् इतिटासकथाम् आश्रित्य प्रणीतम्। अत्र परमानन्द्यायकाः धर्मार्थकामोक्षरूपाश्वत्वारो वर्गाः विहिताः। प्रारम्भेऽस्मिन् पार्वती-परमेश्वरयोः नमस्कारात्मकं मङ्गलाचरम् विद्यते। सर्गाणाम् आदिमध्येषु एकविधम् अन्तेषु अन्यविधं वृत्तम् विद्यते। नातिस्वल्पाः नातिदीघाश्चात्र ऊनविंशति सर्गौः। नवमसर्गे चान्यत्र कचित् कचित् नानावृत्तमयानि अपि पद्यानि सन्ति, प्रत्येकं सर्गान्ते भाविसर्मकथा सुङ्केतिता। महाकाव्ये कथनीयाश्च सन्ध्यासर्नदुरात्रिपरदोषाद्यः सर्वं एव विषयाः यथास्थानां वणिताः। भारतीयैः, पाश्चात्यैः अपि विदवद्भिः कृताः रघुवंशस्य अनेकाः टीकाः समुपलमभ्बन्ते। तासु मचिनाथसूरेः टीका प्रसिद्धा। तस्याः नाम सञ्जीवनी-टीका इति। हिन्दीभाषायाम् अपि रघुवंशस्य टीका वर्तते, यस्याः नाम भावर्थदीपिकाभाषाटीका इति। अस्याः हिन्दीटीकाकारः पण्डितज्वालाप्रसादमिश्चः वर्तते। हिन्यां रघुवंशस्य मणिप्रभाटीका अपि वर्तते, यस्याः टीकाकारः श्रीहरगोविन्दमिश्रः। अथ प्राप्तराज्यस्य रघोः कीटशीशोभा आसीदिति तामेवाह १.स राज्यं गुरुणा दत्तं रतिपद्याधिकं बभौ । दिनान्ते निहितं तेजः सवित्रेव हताशनः ॥ ४-१॥ भ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः पदच्छेदः सः, राज्यम्, गुरुणा, दत्तम् प्रतिपद्य, अधिकम्, वभो, दिनान्ते, निहितम्, तेजः, सवित्रा, इव, हताशानः। अन्वयः सः गुरुणा दत्तं राज्यं प्रतिपद्य दिनान्ते सवित्रा निदितं तेजः (परतिपद्य) हुताशनः इव अधिकं बभो। तात्पर्यम् आत्मीयेन पितृचरणेन दिलीपेनसमपितं गुरुणा प्रापितं च राज्यंसंप्राप्यधर्मप्राणस्य रघोः तादृशी शोभा जाता यथादिवसान्तेसूर्यस्तवेलायां अग्नः प्रकाशस्य । अथ रघो राज्येऽवस्थानं श्रुत्वा शत्रूणां हदि सन्तापाधिक्यं वभूवेत्याद- २.दिकीपानन्तरं रज्ये तं निशाम्य प्रतिष्ठितम् । पूर्व परपूमितो राज्ञ हृदयेऽभ्निरिवोत्थितः ॥ ४-२॥ पदच्छेदः दिलीपानन्तरम, राज्य, तम्.निशम्य, प्रतिष्ठितम् , पर्व, प्रपूमितो, राज्ञाम, हृदये,अभ्न इव उत्थितः। अन्वयः दिलीपानन्तरं राज्य तं प्रतिष्ठितं निशम्य पूरव रज्ञा हदये प्रधूमितः अभ्निः उत्थितः इव । (अमूत्)। तात्पर्यम् राज्ञः दिलीपस्य शासने ये विरोधिनः राजानः आसन् , तेषां हृदये वतंमानः धूमयुक्तः स्वल्पसन्तापानिःरघोः राज्यप्रायनन्तरंमहाभ्निजातः। श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः अथ रघुं राज्ये अवस्थितं दृषा सर्वा अपि प्रजाः प्रसन्ना वमवुरित्याद- ३.पुरदरतध्वजस्येव तस्योन्नयनपङ्कयः । नवाभ्युत्थानदरन्यो ननन्दुः सप्रजाः प्रजाः ॥ ४-३॥ पदच्छेदः पुरदरत-ध्वजस्य,इव, तस्य, उन्नयन-पङकयः, नव-अयुत्थान-दरीन्यः, ननन्दुः, सप्रनाः, प्रजाः । अन्वयः पुरदरत-ध्वजस्य इव तस्य नव-अभ्युत्थान-दरीन्यः उन्नयन-पड्कयः सप्रजाः प्रजाः ननन्दुः । तात्यम् जनाःदेवन्द्रपताकाया अभ्युत्थानं विल्परोक्य यथाआनन्द् प्रपरुवन्ति तथेवराज्ञः रघोरपि नवीनम् अभ्युदयं दृष्वास्वसन्ततिभिस्साकंविद्यमानाः प्रजाः आनन्द प्राप्तवन्तः । अथ रघोः सिंहासनारूढक्षण एव शत्रुमण्डलमपि पदाकरान्तमभृदित्याह- ¢.सममेव समाकान्तं यं द्विरदगामिना । तेन सिंहासनं पियमखिलं चारिमण्डलम् ॥ ४-४॥ पदच्छेदः समम्, एव, समाक्रान्तम्, हयम्.दिरद्-गामिना ,तेन, सिंहासनम्, पित्र्यम्, अखिलम्, च, अरिमण्डलम्। अन्वयः द्विरद-गामिना तेन समम् एव द्यं समाकान्तं पित्र्यं सिंहासनम् अखिलम् अरिमण्डलं च । तात्परयम् गजगामी रघुः पित्र सिंहासनं समपरणं शतरुमण्डलच एकस्मिन्नेव काले समाक्रन्तवान् । 12 श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः अथ सिंहासनारोहणानन्तरं तस्य लक्ष्मीसन्निधानमाह-

५.छायामण्डलल्येण तमदस्या किल स्वयम् । पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ४.५॥ पदच्छेदः छायामण्डल-लक्षयेण, तम्, अदृश्या, किट, स्वयम्, पद्मा, पद्मातपत्रेण, भेजे, साम्राज्य-दीक्षितम् । अन्वयः पदमा स्वयम् अदृश्या किल छाया-मण्डल-लकषयेण पद्म-आतपत्रेण साम्राज्य-दीक्षितं तं मेजे । तात्पर्यम् राज्याभिषिक्तंतमवलोक्य तस्य तेजोविषेण स्वयं सन्निहिता लक्ष्मी कान्तिपुञ्जानुमेयेन कमलच्छत्रेण रघुंसिषेवे। सम्प्रति सरस्वतीसाननिध्यमाह- ६.परिकल्पितसान्निष्या काठे काठे च वन्दिषु । स्तुत्यं स्तुतिभिरथ्याभिरुपतस्थे सरस्वती ॥ ४-६॥ पदच्छेदः परिकल्पित-सान्निध्या, काले, काले, च, वन्दिषु, स्तुत्यम्, स्तुतिभिः, अर्थ्याभिः, उपतस्थे, सरस्वती। अन्वयः नि श्रीचनदररोखरेनद्रसरस्वतीविश्वमहाविद्याखयः रघुवंशम्.चतुः सरमः सरस्वती च काले काले वन्दिषु परिकल्पित-सान्निध्या (सती) स्तुत्यं (तम्)अर्याभिः स्तुतिभिः उपतस्थे। तात्पर्यम् सरस्वत्यपियोग्यसमयेषु स्तुतिपाठकेषु व्तिनी भूत्वा स्तोतुं योग्यं राजानंरघुं शोभनार्थैः स्तोत्रे सेवितवती। अथ रघोरनन्यपूरवमिव पृथ्वीशासनमासीदित्याह- ७.मनुप्मृतिमोन्यक्ता यपि राजभिः । तथाप्यनन्यपर्वैव तस्मिन्नासीदसुन्धरा ॥ ४-७॥ पदच्छेदः मनुपरमृतिः,मान्यैः, मुक्ता, यद्यपि, राजभिः, तथापि, अनन्यपूर्वा, इव, तस्मिन्, आसीत्, वसुन्धरा। अन्वयः मनुप्रमृतिः मान्यैः राजभिः यद्यपि मुक्ता तथापि तस्मिन् अनन्यपूरवा इव आसीत् । तात्पर्यम् पृथिवी वैवस्वतमन्वादिभिः नृपैः यद्यपि उपभुक्तातथापि रघो सा अमुक्ता इव जाता। अत्र कारणमाह- <.स हि सवस्य लोकस्य युक्तदण्डतया मनः। आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ४-८॥ पदच्छेदः श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम.चतुर्थः सर्गः सः, दि, सर्वस्य, लोकस्य ,युक्तदण्डतया, मनः , आददे, न अतीतोष्णः, नभस्वान् ,इव, दक्षिणः । अन्वयः हि सः युक्तदण्डतया सर्वस्य लोकस्य मनः नातिशषीतोष्णः दक्षिणः नभस्वान् इव आददे । तात्पर्यम् यथा दक्षिणवायुः अनुष्णाञ्गीतः सन् सर्वान् रमयति तथैव नातिमूदुना नातिकठिनेन दण्डेन (यथापराधदण्डत्वेन) रघुणापि प्रजाः वज्षीकृताः। बोधयप्रशनाः 1. रघुवंशमहाकाव्यस्य कर्ता कः 2. रघुवंशमहाकाव्ये कति सर्गाः सन्ति 3. रघुवंशमहाकाव्यस्य चतुर्धसर्गस्य कति शोकाः सन्ति 4. कालिदासः कीदशः कविः। तस्य परिचयं कुरुत। 5. रघोः राज्यप्रि वर्णयत। शब्दावली पुरुट्रतध्वजः, पित्र्यम, नभवस्वान्, अरिमण्डलम् सारांशः रघोः गुणानां ज्ञानं छत्रैः संप्राप्तम् छात्राणां कालिदासस्य काव्यदोलीज्ञानमभूत् श्रीचनदरदोखरेत्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम.चतुर्थः सर्गः दवितीयः खण्डः - रघोरयराः पाठसंर्वना 1. प्रस्तावना 2. उदेश्यम् 3. चतुरथसर्गस्य सारांशः 4. चतुर्थसर्गस्य प्रथमश्वोकादारभ्य अष्टाविंतिश्ोकपर्यन्तभागः (शोकः, पदच्छेदः, अन्वयः, तात्पर्यम्) . वोधपरश्नाः . शब्दावली . सारांशः . अभ्यासप्रश्नाः © @ > > छर . संदर्भगन्थस्ची 10.सहायकग्रन्थसुची प्रस्तावना रघोः यशः इति अनेन पाठेन राजा रघुः दिग्िजयारथ पराचीमुदिकय प्रस्थितो भवति। तत्र पूरव सुह्यानां ततश्च वङ्गानां जयो वर्णितः। ततः क्रमाः पूर्वदेश्ानां जयवर्णनपुरस्सरं दक्षिणाशां प्रति गमनं वर्णितं विदयते। श्रीचनदरदोखरेत्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम्.चतुः सरमः उदेश्यम् . महाकाव्यदोलीज्ञानम् ,,, रघोः गुणानां ज्ञानम् छ > ~ . काटीदासस्य काव्यदोलीज्ञानम् . नूतनानां शब्दानां ज्ञानम् . वाक्यरचना कोशलसम्पादनम् 9 जा छ . पौराणिकेतिहासस्य ज्ञानम् अथ रघोः सुप्रन्धेन प्रजावर्मस्य दिलीपकतृकसुप्रबन्धस्य विस्मरणमाद- ९.मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ । फलेन सहकारस्य पुष्पोद्रम इव प्रजाः ॥ ४-९॥ पदच्छेदः मन्दोत्कण्ठाः, कृताः, तेन, गुणाधिकतया, गुरौ, फलेन, सहकारस्य, पुष्पद्मे, इव प्रजाः । अन्वयः तेन प्रजाः गुरौ सहकारस्य फलेन पुष्पोदरमे इव गुणाधिकतया मन्दोत्कण्ठाः कृताः । तात्पर्यम् मानवाः आभ्रफलमवाप्य यथा तत्कलिकायां न्यूनादारा भवन्ति तथैव रघोः उत्तमोत्तमान् गुणान् ष्टा दिलीपं प्रत स्वल्यौत्सुक्या जाताः। १०.अथ रघोः सदसतोर्मध्ये सदेवाभिमतमासीदित्याह- नयविद्धिनव राज्ञि सदसचोपदशितम् । श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः पू एवाभवत्यक्षस्तस्मिन्नाभवुत्तरः ॥ ४-१०॥ पदच्छेदः नयविद्धिः,नवे, राज्ञि सद्, असद्, च,उपदीतम् , पूर्व ,एव,अभवत्, पक्षः, तस्मिन्, न, अभवत्, उत्तरः। अन्वयः नयविद्धिः नवे राज्ञि सद् असद् च उपदितम्। तस्मिन पूर्वः पक्षः एव अभवत् उत्तरः न अभवत्। तात्पर्यम् नीतिवेत्रा मन्त्रिभिः रघोः सकाशे धरमयुद्धं कूटयुद्धं च प्रदीतम्।किन्तु रघुः केवलं धर्मयुद्धपक्षमेव आश्रितवान्। अथ रघोः राज्य द्रव्येषु गुणानां गन्धादीनामुत्कर्षमाह- १९पत्ानामपि भूतानामुत्कष पपुषुगुणाः । नवे तस्मन्महीपाले सर्वं नवमिवाभवत् ॥ ४-११॥ पदच्छेदः पञ्चानाम्, अपि, भूतानाम्, उत्कर्षम्, पुपुषुः गुणाः, नवे, तस्मिन्, महीपाटे, सर्वम्, नवम् , इव,अभवत् । अन्वयः पञ्चानाम् अपि भूतानां गुणाः उत्कर्षं पुपुषुः। तस्मिन् नवे महीपाले सति सर्व नवं इव अभवत् । तात्पर्यम् रघुणा यदा राज्यंप्राप्तम् तदा एव पृथिव्यप्तेजोवाय्वाकाशानां पन्चमहाभूतानामपि गन्ध-रस-रूप- स्पर्च-शब्दाख्या गुणाः उत्कर्षम् आपुः । नूतने महीपाले सम्मराप्ते सर्वमपि वस्तु नूतनमिव अभवत् । नि श्रीचनदररोखरेनद्रसरस्वतीविश्वमहाविद्याखयः रघुवंशम्.चतुः सरमः अथ रघुरन्थ्यो राजाऽम्दित्याद- १२.यथा परह्मदनाचन्द्रः पतापात्तपनो यथा । तथैव सोऽभूदन्थ्यो राजा प्रकृतिरञ्जनात् ॥ ४-१२॥ पदच्छेदः वथा, प्रहादनात् चन्द्रः प्रतापाद्, तपनः, यथा, तथा, एव, सः, अभूत्, अन्वर्थः ,राजा प्रकृतिरञ्जनात् । अन्वयः यथा चन्द्रः प्रहयादनात् अन्वर्थः अभूत् यथा तपनः प्रतापादु अन्वर्थः तथा एव सः राजा प्रकृतिरञ्नात् अन्वर्थः अमूत्। तात्पर्यम् यथा आहाद्जनकत्वात् चन्द्रः चन्द्रपदेन, सन्तापजनकत्वात् तपनः तपनराब्देनव्यवहियतेतथेव प्रजायाः स्वस्मिन् अनुरागजननात् रघुः अपि राजा इति शब्देन व्यवहियतेस्म । अथ चक्षष्मतोऽपि रघोर्छीचनं शाखमेवासीदित्याह- १३.कामं कणान्तविशरन्ते विशाले तस्य लोचने । चक्षुष्मत्ता तु शाखेण सूषष्मकायाथददिना ॥

४-१२॥ पदच्छेदः कामम्, कर्णान्तविशरान्ते, विद्ाले, तस्य, लोचने, चक्ष्मत्ता, तु. शास्रेण, सृक्षमकार्यार्थदर्दीना। अन्वयः विशाले तस्य लोचने कामं कर्णान्तविश्ान्ते (आस्ताम्) तु चक्षुष्मत्ता सूमकायारथदृीना शाखेण एव (आसीत्) । नि श्रीचनदररोखरेनद्रसरस्वतीविश्वमहाविद्याखयः रघुवंशम्.चतु: सरमः तात्प्यम् यद्यपि रघोः नेत्रे अत्यन्तं श्रोत्रयोः प्रान्त गते अतिसुन्दर आस्ताम् तथापिरघुः केवलं ताभ्यामेव नेत्रवान् इति न अपितु अप्त्यक्षान् पदार्थान् शखरूपलोचनेनैव अवलोकयन् सः चक्षुष्मान् जातः। अथ रघोः दिग्विजय योग्यः समयः शरटतुः प्राप्त इत्याह- श४.लब्धपरकामनस्वस्थमथनं समुपस्थिता । पाथिवशीदितीयेव शारत्यङ्कजलक्षणा ॥ ४-९४॥ पदच्छेदः लब्धप्रहामनस्वस्थम्, अथ, एनम्, समुपस्थिता, पा्थिवश्री, दितीया, इव , शरद् पङ्कजलक्षणा। अन्वयः अथ लब्धप्रहामनस्वस्थम् एलं पदङ्कजलक्षणा शरद् तीया पार्थिवश्रीः इव समुपस्थिता। तात्पर्यम् छब्धप्रशमः सः रघुः यदा राज्यं प्राप्तवान् तदेवे सर्वत्र शान्ति संस्थाप्य स्वस्थः जातः। एवं च शरदतुः विकसितेन पङ्गजव्याजेन अपरा राजलक्ष्मीः इव तं सेवितवती। अथ शरद्दतोः गुणान् वर्णयन् कविरादौ सूर्यस्य रघोश्च साम्यस्थितिमाह- १५ निरवषटलघुमिरमधेमुक्तवत्मा सुदुःसहः । प्रतापस्तस्य भानोश्च युगपव्यानदो दिशः ॥ ४-१५॥ निरवृटलघुभिः ,मेधेः,मुक्तवर्त्मा, सुदुःसहः, प्रतापः, तस्य ,मानोः,च,युगपत, व्यानरो, दिकाः। नि श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः निर्वृष्टलघुभिः मेघे मुक्तवत्मा अत एव सुदुःसहः तस्य भानोः च प्रतापः युगपत् दिशाः व्यानरो। तात्पर्यम् वृष्नन्तरं यथा घवलजलद्स्य परित्यक्तपन्थाःसूर्यः स्वतीवप्रकादोः जनान् सन्तापयति तथैव तस्य रघोरपि राज्ञः प्रतापः सर्वासु दिक्षु प्रसृतः । अथेन्द्रस्य वार्षिकधनुः संहारानन्तरं रघोजेत्रधनुधीरणमाह- १६.वा्षिकं संजहारिद्रो धतत रघुदैधो । प्रजार्थसाधने तौ हि पयायोद्यतकामुंकौ ॥ ४-१६॥ पदच्छेदः वार्षिकम्, संजहार, इन्द्रः, धनुः , जत्र, रघुः, दधौ, प्रजार्थसाधने, तो, दि, पर्यायोयतकार्मुको । अन्वयः इनदरः वार्षिकं धनुः संजहार रघुः जैत्रं धनुः दधौ हि तौ प्रजार्थसाधने पर्यायोद्यतकारमुको आस्ताम्। तात्पर्यम् देवेन्द्रेण शरद्दतौ वर्षाकालिकं शरासनं संहृतम्। राज्ञा रघुणा जयज्षीटं स्वचापं रोकविजयाय गृहीतम्। इन्द्ररघू करमशः स्वं स्वं घनुः गृहीत्वा प्रजायाः अर्थसाधने वृषरूपेण दिग्विजयेन च सर्वदा तत्परौ आस्ताम् । नि श्रीचनदररोखरेनद्रसरस्वतीविश्वमहाविद्याखयः रघुवंशम्.चतु: सरमः अथ शरदकर्तकं रघो राजचिहस्य छत्रचामररूपस्य सानुकरणमाट- १७.पुण्डरीकातपत्रस्तं विकसत्काशाचामरः । ऋतुरविंडम्बयामास न पुनः प्राप तच्छियम् ॥ ४-१७॥ पदच्छेदः पुण्डरीकातपत्र, तम्, विकसत्काशचामरः, ऋतुः, विडम्बयामास, न ,पुनः, प्राप, तच्छियम् अन्वयः पुण्डरीकातपत्रः विकसत्काशचामरः ऋतुः तम् विडम्बयामास, पुनः तच्छरियम् न पराप। तात्पर्यम् शरदतुः घवकुकमलरूपेण छत्रेण प्रस्फुरितकाडातृणरूपेण चामरेण सहितेन च रघोः अनुकरणं कृतवान। किन्तु रघोः याखलु शोभा आसीत् ताम् शोभाम् प्रापुम् असमर्थः आसीत्। अथ सर्वासां प्रनानां तस्मिन् रघो पर्णतमा प्रीतिरासीदित्याह- १८रसादसुमुखे तस्मिश्चन्द्रे च विादपमे । तदा चशरुष्मतां ्रीतिरासीत्समरसा हयोः ॥ ४-१८॥ पदच्छेदः प्रसादसुमुखे, तस्मिन, चन्द्र, च, विादप्रभे, तदा चक्षष्मताम्, प्रीतिः,आसीत्, समरसा, योः । अन्वयः प्रसादसुमुखे तस्मिन विशदप्मे चन्द्रे च द्योः तदा चक्षष्मताम् प्रीतिः समरसा आसीत्। तात्परयम् श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः जनाः शरद्दतौ यथा निरं चन्द्रं विलोख्य प्रसन्नाः जाताः तथेव, चारुकान्तिमन्तं रघुं षा अपि ते प्रसन्ना जाताः| अथ रघुवंशसां धवलिमवर्णनमाह- १९.हंसभ्रणीषु तारासु कुमुदरतसु च वारिषु । विभूतयस्तदीयानां परस्ता यदासामिव ॥ ४-१९॥ पदच्छेदः हंसश्रेणीषु, तारासु ,कुमुदत्सु, च, वारिषु , विभूतयः, तदीयानाम्, पर्यस्ता, यशसाम्, इव । अन्वयः हंसधरेणीषु तारासु कुमुदत्सु वारिषु चः तदीयानाम् यशसाम् विभूतयः पर्यस्ताः इव । तात्परयम् शरत हंसावलीषु तारासु कुमुदयुक्तेषु सरोवरादिषु च रघुसंबन्धिनां यशसां संपत्तयः एव धवलिमसमृद्धिः प्रसारिताः इव आसीत् किम् । अत्र उ्येक्षा| अन्यथा कथमेषां धवरतेति भावः| ग्रामीणख्ियोऽपि रघुयश्ोगानपरायणा आसन्नित्याह- २० इषुच्छायनिषादिन्य स्तस्य गो्रौणोदयम् । आकुमारकथोद्धातं शालिगोप्यो जगुर्यशः ॥ ४-२०॥ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतु: सरमः पदच्छेदः इकषुच्छायनिषादिन्यः,तस्य, गोः, गुणोदयम्, आकुमारकथोद्धातम्, शालिगोप्यः, जगु, यशः । अन्वयः इकषच्छायनिषादिन्यः शालिगोप्यः गोतः तस्य गुणोदयं, आकुमारकथोद्धातम् यद्ञः जगुः। तात्पर्यम् इष्षुणां छायासु समुपविष्टवन्तः शस्यपालिकाः खियः रघोः कोमारादारभ्य शौ्यादिगुणयुक्तं कीर्विजकथयन् । अथ रघोः प्रतापोदयेन निजाभिभवशङ्कया शत्रूणां मनः श्रुभितं वभूवेत्याह- २१प्रससादोदयादम्भः कुम्भयोनेम्महौजसः । रघोरभिभवाशङ्क चुभे द्विषतां मनः॥ ४-२१॥ पदच्छेदः प्रससाद्, उदयात्, अम्भः, कुम्भयोनेः, महौजसः, रघोः, अभिभवाशाङ्क,चुषमे, दिषताम्, मनः। अन्वयः महोजसः कुम्भयोनेः उदयात् अम्भः प्रससाद्। महोजसः रघो उदयात् अभिभवाशङ्कि दिवताम् मनः चुक्ुभे। तात्पर्यम् नक्षत्रस्यअगर्त्यस्य प्रदुरभावात् सकर्दमं तीर्थं जातम् । वलिनः दिलीपकुमारस्य रघोः विजयप्रस्थानम् आकण्यं शत्रूणां चित्तं पराभवशङ्काया क्षोभयुक्तं जातम्। अथ रघोर्मदोक्षवच्छोर्यमासीदित्याह- ति श्रीचनदररोखरेनद्रसरस्वतीविश्वमहाविद्याखयः रघुवंशम्.चतु: सरमः २२.मदोदग्राः ककुद्मन्तः सरितां कूलसुद्रनाः । लीलाखेलमतुप्रापुमहोक्षास्तस्य विकमम्॥ ४-२२॥ पदच्छेदः मदोदग्राः, ककुद्मन्तः, सरिताम्, कूलमुद्रुजाः, लीलाखेलम्, अनुप्रापुः महोक्षः, तस्य, विकमम्। अन्वयः मदोदग्राः ककुद्रन्तः सरितां कूलमुद्रनाः मोक्षाः ीलाखेलम् तस्य विक्रमम् अनुप्रपुः। तात्यम् सोत्साहसमृद्धिवपुष्मतः परदमनज्ञीरस्य रघोः शौर्यस्य, मदेन उन्मत्तः महाककुद्ः वृषभाः

नदीतटमुत्पाटय स्वशङ्ैः अनुकरणं कृतम्। अथ रघोः सैन्ये मदोन्मत्ता गजेन्द्रा आसन्नित्या- २भ्रसवैः सप्पणीनां मदगन्धिभिराहताः । असूययेव तन्नागाः सपैव परसुसुवुः ॥ ४-२६॥ पदच्छेदः प्रसवैः, सप्तपर्णा, मदगन्धिभिः, आहताः, असूयया, इव, तन्नागाः, सप्तधा, एव, प्रसुसुवुः। अन्वयः मद्गन्धिभिः सप्तपर्णानां प्रसवैः आहताः तन्नागाः असूयया इव सप्तधा एप्रसुसुवुः । नि श्रीचनदररोखरेनद्रसरस्वतीविश्वमहाविद्याखयः रघुवंशम्.चतुः सरमः तात्य्म् रघुसेनायां विद्यमानाः गजाः स्तप्णकुसुमानां गन्धं स्वीकृत्यायं वन्यगजामद्गन्ध इव स्पर्धया इव करकटादिभ्यः स्वयमपि सप्तस्थानेभ्यः मदं ववृषुः । असौ शरदतुः दिग्विजयाय रधु प्रथमं प्रेरयामासेत्याद- २४.सरितः कुवैती गाधाः पथश्चाह्यानकदेमान् । यात्रायै चोदयामास तं शाक्तः प्रथमं शारत्॥ ४-२४॥ पदच्छेदः सरितः, कुर्वती, गाधाः, पथः, च, आश्यानकर्दमान, यात्रायै, चोदयामास, तम्, शक्तेः, प्रथमम्, शरद् । अन्वयः सरितः गाधाः कुर्वती पथः च आशयानकर्दमान् कुर्वती शरद् तं शक्तः प्रथमम् यात्रायै चोदयामास। तात्पर्यम् शरदि सरिताः सुप्रतराः सम्पन्नाः पन्थानश्च पद्करहिताः बभुवुः शरदतुना रघुः उत्साहक्तः प्रथमं विजययात्रायै पररितः। अथ रघोरयात्रासमये शुभशकुनं सूचयन् वहिः प्रदक्षिणाचिवभृवेत्याह- २५.तस्मै सम्यग्धुतो वहविवाजिनीराजनाविधौ । प्रदक्षिणाचिर्व्याजेन हस्तेनेव जयं ददौ ॥ ४-२५॥ 26 श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः पदच्छेदः तस्मै, सम्यग् , हतः, वहिः वाजि-नीराजनाविधौ, परदक्षिणार्चि-व्याजेन, हस्तेन, इव, जयम्, ददौ । अन्वयः वाजि-नीराजनाविधो सम्यग् हुतः वहिः प्रदक्षिणाचि.र्व्याजेन हस्तेन इव तस्मै जयं द्वौ। तात्पर्यम् रघुणा नीराजनाख्यश्ान्तिकर्म यथाशाखं कुर्वता वदहौ हवनीयं द्रव्यं यदा तर्पितम्तदैव विना प्रदक्षिणाज्वालया तस्मै स्वकरेणेव विजयः प्रदत्तः। अथ रघोः दिग्विजययात्रा सूचयति- २६.स गुप्मूलमत्यन्तः शुदधपाष्णिरयान्वितः । बद्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ ४-२६॥ पदच्छेदः सः, गुप्त-मूल-परत्यन्तः, शुद्ध-पाष्णिः, अयान्वितः, षद्विधम्, वलम्, आदाय, प्रतस्थे, दिग्जिगीषया । अन्वयः गुप्त-मूल प्रत्यन्तः शुद्ध-पार्ष्णिः अयान्वितः सः षद्विधम् वलम् आदाय दिग्जिगीषया प्रतस्थे। तात्पर्यम् पित्राप्राप्तस्य राज्यस्य प्रबन्धं सम्पाद्य पृष्ठशत्रं च व्यापाद्य मङ्गलाचारपूर्वकः शुभावहविधियुक्तः पद्विधं सेनां गृहीत्वा रघुः जेतुमिच्छया दिग्विजयं कर्तु प्रस्थतवान्। अथ दिग्विजयाय प्रस्थितस्य तस्य रघोरुपरि पौरवृदधाङ्गनानां साजप्क्षपमाह- २७.अवाकिरन्वयोवद्ास्तं साजैः पौरयोषितः । १ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः पृषतेर्मन्दरोदूतैः क्षीरोर्मय इवाच्युतम्॥ ४-२७॥ पदच्छेदः अवाकिरन, वयोवृद्धा ,तम,लाजेः, परयोषितः, पृषते,मन्दरो दूत कीरोर्मयः, इव,अच्युतम्। अन्वयः वयोवृद्धाः पौरयोषितः तं लाजैः मन्दरोदूतै पृषतैः कषरोर्मयः अच्युतम् इव अवाकिरन्। तात्यम् दिग्विजयाय गमनोद्यतस्यरघोरुपरि वयोवृद्धाः पौरयोषितः लाजेःवर्षा चक्रुः, यथा समुद्रमन्थनसमये अच्युतस्य उपरि क्षीरसागरवीजयः मन्द्रानलादुत्पन्नैः जलबिन्दुभिःवर्षा चकरुः। अथ युग्मेन प्रथमं रघोः प्राच्यां दिदि गमनमभृदित्याह- २८स ययौ प्रथमं प्राचीं तुल्यः प्राचीनवर्हिषा । अदितानानिलोदूतस्तर्जयननिव केतुभिः ॥ ४-२८॥ पदच्छेदः सः, ययो, प्रथमम्, प्राचीम्, तुल्यः, पराचीनवर्हिषा, अदितान्, अनिलोदूतेः, तर्जयन्, इव, केतुभिः । अन्वयः पराचीनवर्हिषा तुल्यः सः अनिलोूते केतुभिः अदितान् तर्जयन् इव प्रथमम् प्राचीं ययो । तात्पर्यम् देवेन्दरसद्दशेन रघुणा पवनेन उत्क्षिप्तः स्वकीयः सेनाध्वजेः शात्रून भरस्यता इव प्रथमं पूर्वा दिकं प्रति प्रस्थतम्। श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुर्थः सर्गः बोधयप्रशनाः 1. कुम्भयोनिः कः 2. शरत् कथं चोदयामास 3. प्राचीनवर्दिषा तुल्यः कः शब्दावली प्ाचीनवर्हिः, गुपतमूलप्रत्यन्तः, शुद्धपाष्णिः, कवुदान्तः सारांशः महाकाव्योलीज्ञानं छात्राः जातम् रघोः गुणानां ज्ञानं छात्राः संप्राप्ताः छात्राणां कालिदासस्य काव्यदोलीज्ञानमभूत् नूतनानां शब्दानां ज्ञानं जातम् वाक्यरचनाकोशलं संपादितम् पुराणेतिहासस्य ज्ञानमभूत् 2 श्रीचनदरदोखरेत्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम.चतुर्थः सर्गः तृतीयः खण्डः -रघोः जैत्रयात्रारम्भः पाठसंस्चना 1. प्रस्तावना 2. उदेश्यम् . चतुर्थसर्मस्य एकोनत्रिरात् श्रोकात् आरभ्य अण्चत्वारिंडत् शटोकपर्यन्त भागः ( श्वोकः, = पदच्छेदः, अन्वयः, तात्पर्यम्) . वोधप्राः . शब्दावली . सारांशः ,, अभ्यासप्श्ाः . सन्दरभगरन्थसूची © @ म्पि 9 छ प . सहायकग्रन्थसुची प्रस्तावना रघोः जेत्रयात्रारम्भः इति अनेन पाठेन अवगन्तुं शक्यते यत्र राजा रघुः दिग्विजयार्थ प्राचिमुदिशय प्रस्थितो भवति। दिग्विजयगमनवेलायां मार्गे प्रकृतेः स्वरूपं तत्र जलायाः, वनानि, मस्परान्तादीनां वर्णननं सुष् अवगन्तुं शक्यते। इतः परं पर्वसागरस्य प्राततः परं तत्र भागिरथी गङ्गायाः दनं अनेन कृतम्। एवंच करमशः तान् तान् दिश्ान् गत्वा सर्वत्रापि जयं सम्भराप्य स्वस्य सामर्थ्य प्रतिपादितवान्। इतः परं नि श्रीचन्द्रशेखरेन्त्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम्.चतुः सरमः ब्गदेशस्योपरि विजयं पराप्य महेनद्रगिरिं प्रति गत्वा तस्मिन् स्वस्य प्रतिष्ठा स्थापिता। तत्र महेनद्राधिपस्य राष्ट विजित्य तस्य राजलक्ष्मीं अपहृतवान् इति। ततः परं अयं राजा रघु दक्षिणदिशि प्रस्थितवान् उदेश्यम् 7. महाकाव्यदोलीज्ञानम् 8. रघोः गुणानां ज्ञानम् 9. कालीदासस्य काव्यशेलीज्ञानम् 10. नूतनानां शब्दानां ज्ञानम् 11. वाक्यरचना कोशलसम्पादनम् 12. पौराणिकेतिहासस्य ज्ञानम् अथकवीरघोःसैन्यवाहुल्यंयोतयन्नाह- रजोभिः स्यन्दनोदधैूगंजैश् घनसंनिमैः। भुवस्तरमिव व्योम करवन््योमेव भूतलम्॥४-२९॥ पदच्छेदः रजोभिः, स्यन्दनोदतैःर्गजैः च, घनसंनिभेः, मुवस्तलम,इव, व्योम, कुर्वन, व्योम, इव, भूतलम्। अन्वयः स्यन्दनोदधूतेः रजोभिः घनसंनिभेः गजः च व्योम भुवस्तलम् इव भूतलम्ब्योम इव कुर्वन्ययो। तात्परयम् श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः राजा रघुः स्वकीयैः सेन्यगजैः, भूतलं घनयुक्तं व्योम इव तथा स्यन्दनैः उत्थापितानि घूलिभिः, आकां घूलियुक्तं धरातलमिव

कुर्वन्जनगाम। अथ रघोःसैन्यगमनं वर्णयन्नाह- प्रतापोऽग्रे ततः इन्दः परागस्तदनन्तरम्। ययो पश्चाद्रथादीति चतुःस्कन्धेव सा चम्: ॥४-२०॥ पदच्छेदः प्रतापः, अग्रे, ततःशब्दः, परागः तदनन्तरम्, ययो, पश्चाद्, रथादि, इति, चतुःस्कन्धा, इव, सा, चमूः। अन्वयः अगर प्रतापः ततः शब्दः तदनन्तरं परागः पशचद्रथादि इति चतुःस्कन्धा, इव, सा, चमूःययो। तात्पर्यम् आदौ तेजः, ततः सेनायाः कोलाहलः, तस्यानन्तरं रथस्य धूलिः, ततःस्यन्दनाद्यः, एं वयूहचतुष्टयवती रघोः सेना दिग्विजयार् पूर्व प्राचीमुदिश्य प्रस्थितवान् स्थलेऽपि च सर्वत्र सुखेन गमनमासीदित्याट- मरुपृष्ान्युदम्भांसि नाव्याः सुप्रतरा नदीः। विपिनानि प्रकाशानि शक्तिमतत्वाचकार सः॥४-३१॥ पदच्छेदः मरुपृष्ठानि, उद्म्भांसि, नाव्याः, सुप्रतराः, नदीः, विपिनानि, प्रकाशानि, शक्तिमत्वात्, चकार,सः। अन्वयः श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः सः शक्तिमत्तवान्मरुपृष्ठानि उदम्भांसि चकार नाव्याः नदीः सुप्रतराः चकार विपिनानि प्रकाशानि चकार। तात्पर्यम् सर्वसामर्थ्यशालिनः राजा रघुः स्वविजययात्रासमये मरुपरदेशान् जलयुक्तान्कृतवान्। नावा तरणयोग्या नयः सुखतारणयोग्याः तेन कृताः। वनानि च वृक्षच्छेदादिना प्रकाशयुक्तानि कृतानि। शक्तिमत्वात्तस्य किमपि असाध्यं नास्ति इति प्रतिभाति। अथ पूर्वीयसिन्धुतटमुदिर्य गच्छन्तीं महतीं सेनां नयतो रघोः शोमा वर्णयन्नाह- ससेनां महती कर्षनपूरवसागरगामिनीम्। बभौ हरजटाभ्रष् गङ्गामिव भगीरथः ॥४-३२॥ पदच्छेदः सः, सेनाम्, महतीम्, कर्षन्, पूर्वसागरगामिनीम्, वभो, हरजटाभरष्टाम्, गङ्गाम्, इव, भगीरथः । अन्वयः पूर्वसागरगामिनीं महती सेनां करषन्हरजटाभ्रं (पर्वसागरगामिनीम्) गङ्ग कर्षन्भगीरथः इव वभो। तात्यंम् दिग्विजयार्थ पूर्वदिशि प्रस्थितः रघुः स्वसेनां पूर्वसागरपर्न्तं नयन्, शिवस्य मस्तकान्निर्गलितां गङ्ख पूर्वसागरं नयन्भगीरथः इव शोभामुवाह इति। अथ रघोः सेन्यमार्मः प्रतिबन्धरहित आसीदित्याह- त्याजितैः फलमुत्खातैरभ्रशच बहुधा नृैः। तस्यासीदुल्बणो मार्गःपाद्पैरिव दन्तिनः ॥४-३२॥ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः पदच्छेदः त्याजितः, फलम्, उत्खातः, भग्नैश्च, बहुधा, नृपैः, तस्य, आसीत्, उल्वणः, मार्मः,पाद्पै, इव, दन्तिनः। अन्वयः फलं त्याजितैः उत्खातैः बहुधा भग्रश्च नृपैः पादपैः दन्तिनः इव तस्य मार्गः उल्वणः आसीत्। तात्पयंम् यथा बलिष्ठः मदोन्मत्तगजः मार्गे वर्तमानान्पादपान् फलरहितान्विधाय कांश्चिच उन्मूकितान्कृत्वा चूर्णीकृत्य स्वपथं निष्मरतिबन्धं करोति। तथैव रघुणापि काशिवराज्ञः लाभरदितान्कृत्वा कांश्चिच पदभ्रटन्विधाय कांश्चिच युद्धे त्वा स्वमार्गः कण्टकशन्यः स्पष्टः कृतः। अथ दिग्विजयं कुर्वतो रघोः पूर्वसमुद्रतटसमीपप्राप्तिमाट- पौरसत्यानेवमाकामंस्तंस्ताञ्जनपदाञ्जयी। प्राप तालीवन्याममुपकण्ठं महोदधेः ॥४-२४॥ पदच्छेदः पौरस्त्यान, एवम, आक्रामन्, तान्, तान, जनपदान्, जयी, प्राप तालीवनश्यामम्, उपकण्ठम्, महोदधेः। अन्वयः जयी एवम्पोरस्त्यान्तान्तान्नपदान् आक्रामन्तालीवनरयामम्महोदधेः उपकण्टम्माप। तात्पर्यम् जयनक्शीलः रघु इत्थं पूर्वदिग्भवान्तान्तान्द्ग्भागान् आक्रामन्, सर्वत्र विजयं प्राप्य तालवृक्षाणां वनैः कृष्णं सागरस्य तटसमीपम् प्राप्नोत् श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः अथ रघोः सकाशात्सुहयदेशीयानां नृपाणां पादप्रणत्या आत्मसंरक्षणमाह- अनम्राणां समुद्धतुस्तस्मात्सन्ुरयादिव। आत्मा संरक्षितः सुदयवत्तिमाभित्य वैतसीम् ॥४-२५॥ पदच्छेदः अनम्राणाम्, समुद्धत, तस्मात्, सिन्धुरयात, इव, आत्मा,संरक्षितः,सुदयः, वत्तिम, आश्रित्य, वैतसीम्। अन्वयः अनम्राणाम्समुदधतुः तस्मात्सन्धुरयात् इव सुदयैः वैतसी वृत्तिम् आश्रित्य आत्मा संरक्षितः। तात्पर्यम् यथा नदीजलस्य वेगद्धेतस्या नम्रीभूय स्वर्षा क्रियते, तथेव सुह्यदेक्शीयैः क्षत्रियैः नाम राजभिः रघुपादयोः प्रणति कृत्व स्वर्षा कृता। "वलीयसाभियुक्तः दुर्बलः सर्वत्र अनुप्रणतः वेतसधर्मम् आतिष्ठेत्" ~ कोरिल्यः। अथ रघुकरतकं वङ्गदेशीयानां राज्ञा पराभवमाह- व्नानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तम्भान्गङ्गास्रोतोन्तरेषु सः ॥४-३६॥ पदच्छेदः वङ्गान्, उत्खाय, तरसा, नेता, नौसाधनोद्यतान्, निचखान, जयस्तम्भान्, गङ्गास्रोतोन्तरेषु, सः। अन्वयः नेता सः नौसाधनोद्यतान्वङ्गान् तरसा उत्खाय गङ्गास्रोतोन्तरेषु जयस्तम्भान्निचखान। तात्परयम् श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः नोकारूपयुद्धसाधनसन्नदधान्वङ्गदेशीयाव्राज्ञः वलेन विजित्य नायकः रघुः गङ्गाप्रवाहमध्यस्थेषु द्वीपेषु स्वविजयस्मारकान्जयस्तम्भान्स्थापितवान। अथ रघोः समीपे विजितवङ्गदेक्ीयराजकर्तैकमुपटारस्वरूपधनार्पणमाह- आपादपदप्रणताः ककमा इव ते रघुम्। फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥४-२७॥ पदच्छेदः आपादपदप्रणताः, कलमाः, इव, ते, रघुम, फटैः,संवर्धयामासुः ,उत्ातप्रतिरोपिताः। अन्वयः आपादपदप्रणताः,अत एव उत्खातप्रतिरोपिताःते कलमाः इव रघुम्फलैः संवर्धयामासुः। तात्परयम् यथा कलमाख्याः शालिविहोषाः पूर्वम् उत्पाट्य पश्चाम्तिरोपिताः सस्यसमृदि वर्धयन्ति, तथैव पूरव स्वस्थलाच्याविताः पश्चात्मतिष्टापिताः व्गीयाः रघुं धनादिभिः उपदौकनादिभिः द्रव्यैः संवर्धयामासुः। अथ रघुवडगान्विजित्य कलिङ्गाभिमुखो ययावित्याह- सतीत्वौकपिदांसैन्य्ददविरदसेतुभिः। उत्कलादरितपथःकलिङ्गामिमुखोययौ ॥४-३८॥ पदच्छेदः सः तीतवा, कपिशाम्, सैन्यैः, वदध-दिरद्-सेतुभिः, उत्कला-दरीत-पथः, कलिङ्गाभिमुखो, ययो। अन्वयः सः बदध.दविरद्-सेतुभिः, सैन्यैः कपिशं तीर्त्वा उत्कला-द्ित-पथः कलिङ्गाभिमुखो ययो । श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम.चतुर्थः सर्गः तात्पर्यम् सः रघुः स्वसेनागजैः एव सेतुं निर्माय कपिशानाम्रीं नदीं तीत्व उत्कलदेकशीयैः राजमिः प्रदितमार्गः सन्कलिद्गदेशं रकषयीकृत्य प्रस्थितवान्। अथ रघोः प्रतापोमहेन्द्रपर्वतशिखरव्यातो वभूवेत्याट- सप्रतापं महेन्द्रस्य मूं तीण न्यवेशयत्। अदकशं ्िरद्स्येव यन्ता गम्भीरवेदिनः ॥४-२९॥ पदच्छेदः सः, प्रतापम्, महेन्द्रस्य, मूर्धि, तीक्ष्णम्, न्यवेशयत्, अङ्काम्द्िरदस्य, इव, यन्ता, गम्भीरवेदिनः, प्रतिजग्राह । अन्वयः सः महेन्द्रस्य मूर्धि तीर्णं प्रतापं यन्ता गम्भीरवेदिनः

दविरदस्य मूं तीष्णम् अङ्कम् इव न्यवेशायत्। तात्पर्यम् यथा हस्तिपकः गजरक्षकः वा गम्भीरवेदिनः गजस्य मस्तके तीव्रम् अङ्कुशं निवेशयति, तथैव रघुणापि महेन्द्राचलस्य हिरवे स्वतेजःप्रतिष्टापीतवान्। ॐ श्रीचनदरदोखरेन्त्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम्.चतुः सरमः अथ कलि्गदेशाधिपो युद्धार्थं रघोरभिमुखो वमभुवेत्याद- प्रतिजग्राह कालिङ्गस्तमखैरगजसाधनः। पक्षच्छेदोद्यतं शक्रं शिलाव्ीव पवतः ॥४-४०॥ पदच्छेदः प्रतिजग्राह, कालिङ्गः, तम्, अखैः, गजसाधनः, पक्ष-च्छेदोयतम्, शक्रम्, रिला-वर्षी, इव, पर्वतः। अन्वयः गजसाधनः कालिङ्गः अस्तैः तं पक्षच्छेदोयतं शक्रं िलावषीं पर्वतः इव प्रतिजग्राह । तात्पर्यम् यथा कश्चित्पवतः स्वपक्षाणां चेदोदयक्तं शक्रं रशि्परवर्षैः प्रतिरुरोध, तथैव गजसाधनवान्कलिङ्गदेशीयः राजा शखरेःरघुं प्रत्याभियुक्तवान्। अथ रघोर्विजयलामो वमभुवेत्याद- द्विषां विषह्य काकुत्स्थस्तत्र नाराचटरदिनम्। सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम्॥ ४-४१॥ पदच्छेदः द्विषाम्, विषह्य, काकुत्स्थः, तत्र, नाराच-दुर्दिनम्, सन्मङ्गलस्नात, इव, प्रतिपेदे,जयश्रियम्। अन्वयः काकुत्स्थः तत्र द्विषां नाराच-दरदिनं विषह्य सन्मङ्गल-स्नातः इव जयश्रियं प्रतिपेदे। तात्पर्यम् काकुस्थः राजा रघुः तत्र महेन्द्राद्रौ शत्रूणां शरवर्षणं सोदरा यथा अखं सन्मङ्गलामिषिक्तः इव (माङ्गलिकं सर्वोषध्यादिभिः कृतं अभिषेकम् इव) विजयं पराप्तवान्।। श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः अथ महेन्द्राद्रौ रघुसेनिकाविजयमहोत्सवं चकुरित्याद- ताम्बूलीनां दलैस्तत्र रचितापानमूमयः। नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥४-४२॥ पदच्छेदः ताम्बूलीनाम, दलैः, तत्र, रचिता-पानभूमयः, नारिकेखा-सवम्, योधाः, शात्रवम्, च, पपुः, यशः। अन्वयः तत्र योधाः रचितापानभूमयः नारिकेलासवं ताम्बूलीनां दलैः पपुः, शात्रवं यःच पपुः। तात्पर्यम् तत्र महेन्द्राद्रौ रघोः योधाः आपानभूमिं विरच्य नागवह्टीपुष्पाणां पत्रैः नारिकेलम् अपिबन्, शत्ुसम्बन्धियशः च प्रापुः। अथ रपुर्महेन्द्रनाथं कालिङ्गं विजित्य पुनरपि तं राजासने स्थापयामासेत्याट- गृहीतपतिमुक्तस्य स धर्मविजयी नृपः। शरियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥४-४२॥ पदच्छेदः गृहीत-प्रतिमुक्तस्य, सः, धर्मविजयी, नृपः, श्रियम्, महेन्द्रनाथस्य, जहार, न, तु. मेदिनीम्। अन्वयः धर्मविजयी सः नृपः गृीत-प्रतिमुक्तस्य महेनद्रनाथस्य श्रियं जहार मेदिनीं तु न जहार । तात्पर्यम् धर्मविजयशीलः रघुः पूर्वंविजित्य प्रतिबद्धस्य पश्ात्कृपया परित्यक्तस्य महनद्राधिपस्य राज्यलष्मीम् एव अपहृतवान् न तु पृथिवीम्। श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः अथ पूर्वदिश्चातो दक्षिणादिशं रघुर्ययावित्याह- ततो वेलातटेनैव फलवत्पूगामालिना। अगस्त्याचरितामाशामनादास्यजयो ययो ॥४-४४॥ पदच्छेदः ततः वेखा-तटेन, एव, फलवत्-पृग-मालिना, अगस्त्याचरिताम्, आशाम्, अनाशास्यजयः, ययौ । अन्वयः ततः फलवत्-पृग-मालिनावेला-तटेन एव अगस्त्याचरिताम् आशाम् अनाशास्यजयः "सन. ययो । तात्य्यम् प्राचीविजयानन्तरं फलयुक्तकमुकश्रेणीमता सुशोभितासमुद्रतटाध्वनेन अगस्त्येन अधिष्ठितां दक्षिणां दिशं प्रतस्थे। "अगस्त्यः दक्षिणमाशाम् आशि्त्य नमसि स्थितः" ब्ह्मपुराणे। अथ दक्षिणां दिशं गच्छत्रघुः मार्गे कावेरी प्रापत्याह- ससैन्यपरिभोगेण गजदानसुगन्धिना। कावेरी सरितां पत्युः शङ्कनीयामिवाकरोत्॥४-४५॥ पदच्छेदः सः, सैन्यपरिभोगेण, गजदानसुगन्धिना, कावेरीम्, सरिताम्, पत्युः, शङनीयाम्, इव अकरोत्। अन्वयः सः गजदानसुगन्धिना सैन्यपरिभोगेण कावेरीं सरितां पत्युः शङ्कनीयाम् इव अकरोत्। तात्पर्यम् सः रघुः गजानां मदेन सुरभितेन सैन्यपरिभोगेण कावेरीनदी शोभनगन्धवती तथा जाता यथा समुद्रस्य परपुरुष-उपमक्ता इव अविश्वसनीया अभवत्। ॥ श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम्.चतुः सरमः अथ मार्गे रघुसैन्यं मल्याचलोपत्यकासु निवसति स्मेत्याह- बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः। मारीचोद्धान्तहारीतामलयद्ररुपत्यकाः ॥ ४.४९ ॥ पदच्छेदः वलैः,अध्युषिताः, तस्य, विजिगीषोः, गताध्वनः मारीचोद्धान्तहारीताः, मखयाद्रेः, उपत्यकाः । अन्वयः विजिगीषोः गताध्वनः तस्य वलैः मारीचोद्धान्तहारीताः मलयाद्रेः उपत्यकाः अध्युषिताः। तात्य्यम् विजेतुम् इच्छायुक्तस्य रघोः कियदूरं गतस्युसेनापुरुषेः मारीचवनेषु परिभरान्ताः हरिताख्यपक्षिवाहुल्यवतीषु मलयद्रेः आसन्नभूमिषु वासम् अकरोत्। अथ मलयादररुपत्यकाभूमि वर्णयन्तत्र एताना प्राचर्यमासीदित्याह- ससङ्गरश्वक्षुण्णानामेलानामुत्पतिष्णवः। तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः॥४-४७॥ पदच्छेदः ससञ्गुः,अश्व-कषुण्णानाम, एलानाम्, उत्पतिष्णवः, तुल्यगन्धिषु.मत्तेभ-कटेषु, फल-रेणवः। अन्वयः अश्व-श्रुण्णानाम् एतानाम् उत्पतिष्णवःफल रेणवः तुल्यगन्धिषु, मत्तेभ-कटेषु सन्नः । तात्पर्यम् घोटकैः चूतानां एतमलतानाम् उरध्वगमनञ्शीलफलानां धूलिकणाः स्वसमानगन्धयुक्तेषु सेनागजगण्डस्थलेषु पवनवशात्संपृक्ताः । श्रीचन्द्ररोखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः रघुवंशम.चतुर्थः सर्गः अथ मल्यतरुषु वद्ान्सेनागजान्वर्णयन्नाह- भोगिवे्टनमार्गषु चन्दनानां समपितम्। नास्रसत्करिणां भ्रव त्रिपदीच्छेदिनामपि॥ ४४८॥ पदच्छेदः भोगि-वेष्टन-मारगेषु, चन्दनानाम्, समर्पितम्, न, अखसत्, करिणाम्, ग्रैवम्, त्रिपदी-च्छेदिनाम्, अपि। अन्वयः चन्दनानां भोगि-वे्टन-मारगेषु समर्पितं त्रिपदी-च्छेदिनाम् अपि करिणाम्यैवं न अखसत्। तात्पर्यम् चन्दनपादपेषु सर्पवेष्टनेनसञ्जातरेखासु आघोरणेः निबद्धानां पाद्रन्धनच्छेदकारिणाम् अपि मदोन्मत्तगजानां कण्ठवन्धनानि शिथिलानि न जातानि। बोधप्ाः १. कस्य राज्ञः विजययात्रावर्णनं अस्मिन् सगे अस्ति? २. पादपः इति पदस्य अर्थः कः? ३. करिणां इत्यस्य अर्थः कः? शब्दावली पादपः,मस्तकम,विजिगीषा,अध्वा,नभः इत्याद्यः। ॥ श्रीचनदरदोखरेन्त्रसरस्वतीविश्वमहाविद्यालयः रघुवंशम.चतुर्थः सर्गः सारांशः . महाकाव्यशोलीज्ञानं जातं भवति। , रघोः गुणविषये छात्राणां ज्ञानं जातम् भवति। . कालिदासस्य काव्यदोलीज्ञानं छात्राणाम् ज्ञानं जातं भवति। . नूतनानां शब्दाना ज्ञानं छात्राणाम्

सप्तषषुत्तरचतुःराताधिकदशसहसखरमिताः (१०४९७) इति शाकल्यर्षिः, शोनकानुक्रमण्यः तु अदीत्यत्तर-पञ्चरशताधिक-दशसहखरमितान् (१०५८०) मन्त्रान् आहुः। अत्र भेदे खिलमेदेन कालभेदेन वा मन््वृद्धिलोपावेव हेतुतयोन्नयो भवतः । शब्दसंख्या १५३८२६, अक्षरसंख्या ४२०००। चतुर्दशसु छन्दःसु सर्वेऽपि मन्त्राः विभक्ताः इति वोध्यम्। गृत्समद्-विश्वामित्र-वामदेवा-अत्नि- भरद्राज-वशिष्ठादयः ऋग््ेदगतमन्द्रष्टारो ऋषयः भवन्ति। मण्डलानुसारेण सूक्तानां व्यवस्था (१९१+४२+६२१५८८७-+ १०४९२ ५१११४५१९१) एवमस्ति। एतेषां सूक्तानामतिरिक्तानि एकादश सूक्तानि अपि च बालखिल्यनाम्ना भवन्ति। एतस्य 'वाखखिल्य सूक्तानां स्थानं तु अष्टममण्डलान्तगते एव स्वीक्रियते। अस्मिन्मण्डले प्रमुखसूक्तानि आहत्य द्विनवतिः भवन्ति। खिलसूक्तानां सङ्कलनं कृत्वा तेषां संख्या त्यधिकशतमिता सम्भवति। खिलाब्दास्यारथो वर्तते "परिशिष्टम्" अथवा पश्चात्सङ्कलितमन्त्राः। स्वेनेव यदा अध्ययनं क्रियते तदैव खिलपटनस्य व्यवस्था वर्तते। किञ्चेते खिलमन्त्राः कुत्रापि न उपलभ्यन्ते, न चाक्षरगणनायाम् एव एतेषां मन्त्राणां समावेश््ऽपि भवति। एतेषां यथार्थरूपस्याऽपि बोधो न वर्तते । एतेषामृग्वेदे स्थानम् अष्टममण्डलस्यान्तराले ऊनपन्चाशत्तमात् सूक्तादारभ्य ऊनषष्टितमं सुक्तपर्यन्तमस्ति। एतेषां मन्त्राणां ह्यु = शलल्लरवनमत श्रीचन्द्रेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च संख्याऽश््ीतिरस्ति। अनुवाक-अनुक्रमानुसारेण अपि च एतेषां मन्त्राणां संख्या दशासहस्र-पञचरात- अश्वीतिरस्ति- "ऋचां द्रासहस्राणि ऋचां पञ्चशतानि च। ऋचामदीतिः पादश्च पारणं सम्मकीर्तितम् । । '४३।। ऋचां शाब्दानां संख्या १५६३८२३ वर्तते। यथा- 'क्नाकल्यद्दष्टेः पदलक्षमेकं साधं अपि च वेदे त्रिसहस्रयुक्तम्। शतानि च्ठौ दशतद्वयं अपि च पदानि षट् चेति हि चर्चितानि ।। तथा शब्द्तताक्षरणां संख्या ४२००० वरतते। तद्यथा- 'स ऋचो व्यौहत् दवादशबृहतीसदस्राणि। एतावस्तौ छरचीयाः प्रजापतिसृष्टाः" 'वृहतीच्छन्दः पद्विशदक्षराणां भवति। अतः १२०००५६६-४३२००० वर्तते चत्वारिशत्सहसलाणि त्रिंशच अक्षरसहस्राणि. ऋग्वेदस्य शब्दाक्षरादीनां गणनाप्रसङ्गे यत्र तत्र पार्थक्यमपि परिदश्यते। मालावारीयेण नारायणभ्रेन विरचितः सूक्तशटोकः समुपलब्धो भवति। यन्थेऽस्मिन् ऋग्वेदस्य वर्गाणां सुक्तानाञ्च संख्या निर्घारिताऽस्ति। वर्मसूक्तादीनां गणनाप्रतिपादकश्योकस्तथा तद्विवरणच्च निभ्नरूपेणास्ति- जानन्नपि द्विषामोदं स यज्ञः पातनानरः। रसं भिन्नाय मांसादो नरस्तस्य जलाधिपः ।} नारायणमदटेन दत्तमृग्बेदस्य विवरणम् - मु = शल्लरनमत 7 1 (3 ~ 3 | "| श्वमहाविद्यालयः वेदाः उपनिषदश्च अष्टकानि -< मण्डलानि -१० अध्यायाः -६४ अनुवाकाः -८५ सूक्तानि - १०१९७ ऋवसंहितासाहित्यम् वर्गः - २००६ ऋचः - १०४० अर्धर्चः ~ २०८७५ रब्दाः ~ १५३८१६ अक्षराणि ~ ९४२२१ उपरिनिरदि्टायां संख्यायां बालखिल्यसूतानां गणना न वर्तते, यदि तान्यपि ११ सूक्तानि, ८० ऋचः, १८ वर्गौः, २०४४ अक्षराणि अपि सङकलितो भवेत्तदा, सूतानां संख्या १०२८ वर्गाः २०२४, ऋचः १०५५२ तथा अक्षराणि ३, ९७, २६५ भवन्ति । पुराणादिषु आरण्यकस्य आचार्यत्वेन शौनकस्य नाम ्उद््खितमस्ति "शौनको नाम मेधावी विनज्ञानारण्यके गुरुः" (पद्मपुरा ५।१।१८) पुराणस्य वाक्यमिदं यथार्थमस्ति। यतः आचार्यशोनकः ह्यु = शलल्लरनमत 1 1 (3 ~ 3 श्वमहाविद्यालयः वेदाः उपनिषदश्च ब्रह्मेत्ता ऋषिः आसीत्। स वेदानाम् अध्यात्मपरकं व्याख्यां कृतवान्। यतः अस्व वामीयभाष्ये आत्मानन्देन उल्लिखितम्- 'अध्यात्मविषयां शोनकादिरीतिम'। पद्मपुराणस्य विज्ञानारण्यकशव्दोऽपि आरण्यकस्वरूपस्य परिचायकोऽस्ति। आरण्यकं विज्ञानस्य, विदिषटज्ञानस्य, अध्यात्मज्ञानस्य वा वोधकग्रन्थः वर्तते, इत्यपि एतेन ज्ञायते। आरण्यकस्य महच्् सर्वत्र अङ्गीकृतमस्ति। महाभारतस्य उक्तिः वर्तते यदु ओषधीभ्यो यथा अमृतम् उद्धूतं तथेव वेदेभ्यः सारं समुदधत्य आरण्यकं प्रणीतम् भवति। यथा- 'आरण्यकञ्च वेदेभ्य ओषधिभ्योमृतं यथा। ' (महाभा० १।२६५) मनरबाह्मणात्मकस्यास्य वेदस्य यस्मिन् भागे प्राणविद्यायाः प्रतीकोपासनायाश्च विषये वर्णनं वर्तते स एव अंशः आरण्यकमिति उच्यते। आरण्यकमपि ब्राह्मणस्यैव अंशः विद्यते। तस्य विचिष्टताप्रदर्नाय 'रहस्यत्राह्मणम्' इति नाम अपि प्रसृतम् वर्तते। निरुक्तस्य टीकायां (१।४) दुर्गामहोदयेन 'रेतरेयके रहस्यव्राम्णम्' इति उत्वा पेतरेयारण्यकस्य उद्धरणं दत्तम् (२।२।१)। एतेन रहस्यव्राह्मण- आरण्यकयोः एकत्वं सिध्यति, आरण्यकस्यैव नामान्तरं रहस्यमपि भवति। यतो दि यथा आरण्यकं य्जीयगूटरहस्यस्य प्रतिपादनं विदधाति तथैव कर्मकाण्डस्य दार्शनिकव्याख्याम् अपि उपवर्णयति। मुख्यतः ब्रह्मविद्या इति पदं रहस्यशब्देन ज्ञायते। विषयविवेचनस्य दृष्या आरण्यकेन सह उपनिषदः साम्यमस्ति। अतो वृहदारण्यकादियन्थाः उपनिषदिति रब्देन अपि व्यवदियन्ते। एवं वर्णनीयविषयस्य साम्यत्वेन अपि तयोः किञ्चित् पार्थक्यं परिदश्यते। आरण्यकस्व मुख्यविषयः प्राणविद्या तथा च प्रतीकोपासना भवति। ह्यु = शलल्लरनमत श्रीचन्द्रेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च ऋग्वेदीयदशममण्डलस्य नैकेषु सूक्तेषु लोकिक-व्यावहारिक-विषयाणाच्च रोचकं वर्णनमस्ति । इत्थं विषयाः तु अथर्ववेदस्यैव विशिष्टसम्पदः मन्यन्ते । किश्च ऋग्वेदस्य द्ाममण्डलेऽपि ंविघलोकसंस्कृत्या सह सम्बद्धविषयाणां समुपलब्धिः अस्य मण्डलस्य विकोषतां सूचयति । यक्ष्माख्याव्याधिर्विनाशाय १६१, १६३ तथाऽन्यान्यनेकविधानि च सूक्तानि सन्ति। रक््ोहासृक्ते दानात् गर्भव्राणार्थः मन्त्रोऽस्ति । एकस्मिन् सूक्ते पल्याः कष्टमपहाय पत्युः प्राघ्युपायस्य विवरणं लभते। यथा इमं सनाम्योषधिं वीरुध बलवत्तमम्। यया सपन्नी बाघते यया संविन्दते पतिम्॥ अपरस्मिन् सुकते शत्रु-संहाराय प्रार्थना वत्ते - “ऋषभ मां समानानां सपलानां विषासहितम्। हन्तारं शत्रूणां कृधिविराजं गोपतिं गवाम् ॥ एतेन प्रकारेण १०।१६४ सूक्ते दुःस्वप्रविनाश््ाय प्रार्थना भवति। १०/५८ सृक्तस्य नाम एव “मनः- आवर्तनम' सूक्तमस्ति । वैवस्वत-यम-दिव-भूमि-समुदरादीनां पार्धगतानां

जनानां मनसा परावर्तनारथोय प्रारथनाऽस्ति- यत् ते यमं वैवस्वतं मनो जगाम दूरकम् । तत्त आवतेयामसीदह क्षयाय जीवसे ॥' एकस्मिन् सूक्ते आधर्वण भिषगृषिः ओषधीनां भव्स्तुतिं समुपस्थापयति - ह्म = लललम ः वेदाः उपनिषदश्च '्याः फलिनीय अफला अपुष्पा याश्च पुष्पिणीः। वृहस्पति-पसूतास्ता नो मुञ्चत्वं हसः ॥ एकस्मात् स्तात् ज्ञातो विद्यते यत्, प्राचीनकालेऽपि प्रजा एव राज्ञः वरणमकुर्वन् । यथा - अभित्वा देवः सविताभि सोमो अवीवृत्त्। अभित्वा विश्वामूतान्यभिवचौँ यथाससि। । श्रद्धासुक्तम् ऋग्वेदस्य दशममण्डले श्रद्धासूक्तमस्ति। सुक्तेऽस्मिन् श्रद्धायाः स्तुतिः देवतारूपेण । अत्र मन्त्रास्तु षड् एव सन्ति, एवं विषयस्य अपूरवतवेन स्वल्पकायमपीदं सूक्तं विपूलमहक्त्वस्याभवत्। श्रद्धाशब्दस्य अर्थो विद्यते - कस्मिंश्चित् कार्यविोषे अथवा वचनविषे स्वान्तःकरणेन आद्रातिशयस्य भावना। वस्तुतः श्रद्धया सम्पादितं कार्यमेव लाभदायकं विदयते । श्रद्धाविहीनं कर्म कदापि फलदायकं न विदयते। ९॥ ११३२ मनने ऋत-सत्याभ्यामतिरिक्तस्य श्रद्धया सोम-सवनस्य विधानं दर्चितमस्ति । सोमस्यामिषवः यजमानस्य श्रद्धा प्रकटयति (शरद्धा वदन् सोमराजन् ९॥ ११२॥४)। ऋषिभिः कृतस्तोत्रं ्द्धासमन्वितमनसा इन्द्रेण श्रुतम् (शरद्धामनस्या शरणुतेदभीतये) । वाक्सक्तेकथितमस्ति - श्रुधि श्रत श्रद्धिवं ते वदामि' ॥ अत्र शश्रदधिव' इति पद्स्य सायणेन कृतमर्थम्- शश्रद्धावलेन रभ्य ब्रह्मात्मकं वस्तु अर्थात् 'वह्य श्रद्धया ज्ञातो वियते, उपलब्धोऽपि च विद्यते । अन्येषु मन्त्रष्वपि ऋषीणा श्रद्धां प्रति अतीव पूज्या भावना वर्तते । श्रद्ासृक्ते तु देवतास्वरूपेणेव श्रद्धा चित्रिताऽस्ति । अस्य मन्त्रस्य ऋषिका श्रद्धाऽस्ति, या कामगोरजाऽस्ति, तेनैव कारणेन सा 'कामायनी' इति नाम्ना विख्याताऽस्ति । ह्म = लललम ः वेदाः उपनिषदश्च अस्य सुक्तस्य प्रथममन्त्रे एव स्पष्टीकृतमस्ति यत्, श्रद्धया एवाग्नेः समिन्धनं विद्यते । श्रद्धया आहवनीयाग्नौ आहुतिः देया विद्यते इति। अस्य तात्पर्यमिद्मस्ति यत्, यज्ञीयकार्ेषु श्रद्धायाः महती आवश्यकता वर्तते । अग्निमन्त्रः ज्ञानाः प्रतीकमपि वक्तुं शक्यते । ज्ञानाग्नः समिन्धनमपि श्रद्धया एव सम्पादितं भवेत् । विशाला हि श्रद्धायाः व्यापकताऽस्ति । अस्याः उपासना न केवलं मानवाः कुर्वन्ति, अपि तु देवता अपि असुरैः सह युद्धकाले श्रद्धायाः आश्रयं गृदीत्वा स्वकीयमनोरथं साधयितुं कृतकार्या वियन्ते । अपरस्मिन् मनर मनोवैज्ञानिकतथ्यस्य रोचकं विशेषणं वर्तते- श्रद्धां हृदय्ययाकूत्या श्रद्धया विन्दते वसु ।।' हृदये समुत्यन्नसङ्कल्पेन श्रद्धायाः उपासना विद्यते । प्रथमस्तु साधकस्य चित्ते सङ्कल्पस्योदयो विद्यते, तदनन्तरमेवासौ कस्मिंश्चिदपि कार्ये स्वनियोगं करोति । श्रद्धया धनस्य प्ापिर्भवति । अत्र "वसु इत्येतत्देन भोतिकद्रव्यस्य सङ्केतो न विदयते, प्रत्युत आध्यात्मिककल्याणस्य । आध्यात्मिकं वसु भवति-- अज्ञानस्य विनाशं कृत्वा अमरत्वस्य प्राप्तिः । अमरतायाः समुपलब्धेः प्रधानसाधनमियमेव श्रद्धा वत्ते । अन्तिमा प्ाथना- श्रद्ध श्रद्ापये ह नः ॥" उपनिषत्सु श्रद्धातत्त्स्य यद् विपुलं उपवृंहणमस्ति, तस्य बीजमस्मन्नेव प्रख्यातसुक्ते एव भवति। ऋग्वेदस्य दशममण्डले वहुविधानुञ्ीनेन ज्ञातो विद्यते, तद् देवस्य किंवा देवाधिदेवस्य कल्पना द्दटमूला विद्यते। प्रधानदेवोऽयं कुतश्चित् हिरण्यगर्भरूपेण, कुतश्चित् पुरुषरूपेण, क्राऽपि प्रजापतिनाम्ना ख्यातोऽभवत् । हिरण्यगर्भस्य विषये प्रसिद्धसूक्तमिदमस्ति, यस्य अन्तिमचरणमिदमस्ति- "कस्मै देवाय हविषा विधेम ॥' अस्य चरणस्य कल्पनायां वेदज्ञानां विभिन्नाः सम्मतयः सन्ति । पाश्चात्यविदुषां मते अस्य सुक्तस्य द्रष्टा ऋषिः वस्तुतः सन्दग्धचित्तेन पृच्छति - "कस्मै देवाय हविषा विधेम ।' इति। प्रारम्भिकयुगस्य मानवानां कोतुकाकान्तचित्तस्य दशायां द्योतकमिदं सूक्तं प्रकटयति यत्, केन प्रकारेणादिमयुगस्य जनस्तस्या देवतायाः स्वरूपं ज्ञातुमिच्छति, यस्म देवाय सः हव्येन होमं करोति । मु = शलल्लरनमत श्रीचन्द्रेरेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च ब्राह्मणग्रन्थेषु तथा तदनुसारिणः निरुक्तादिग्रन्थेषु कः शब्दोऽत्र प्रजापतेः सुचकोऽस्ति । किं शब्दस्तु अनिर्वचनीयतायाः वाऽत्यन्तसोख्यस्य सूचको वर्तते। फलतः नाभ्ना रूपेण वानिर्वचनीयाभावेऽपि सुखरूपत्वेन प्रजापतये किं शब्दस्य व्यवहारः नितान्तंयुक्तियुक्तोऽस्ति । उपनिषत्स्वपि अनयाऽनिर्वचनीयतयाऽसौ परमतत्तवम्' "नेति नेति" इति शब्देनाभिव्यक्तं विद्यते । दिरण्यगर्भः अग्र सृष्यादौ विद्यमानः आसीत् । असावेव सर्वेषां समुत्न्नानां प्राणनां रक्षकः आसीत् । स एव हि समस्तं विश्व विभर्ति । जागरत्-स्वप्न-सुषुप्तावस्थायामेकम् एवाऽसौ समग्रभूतानां राजा ( शासकः ) भवति । नास्त्येतावदेव अपि तु मत्योरप्युपरि शासनं करोति । अमृतत्त्वं तस्य छाया वर्तते ( यस्य छायाऽमृतं यस्य मृत्युः ) । यथा छाया पुरुषस्य अनुसरणं करोति, तथैवा अमृतत्वमपि तस्य हिरण्यगर्भस्य अनुसरणं करोति । तस्यैव अध्यक्षतायां समस्तसृटः व्यापारः सञ्लति । सकठसृष्याः पालनस्य संरक्षणस्य च कार्य तस्यैवाधीनमस्ति। देवेष्वसो अद्दितीयदेवोऽस्ति। पुरुषसुक्तम् द्दशममण्डले स्वदार्शनिकविचाराय, निजमहत्वाय, गाम्भीर्याय, अन्तःपरयवक्षणाय च पुरुषसूक्तं ( १०।।९० ) नितान्तं विख्यातमन्यतमश्चाऽस्ति । अस्मिन् सुक्ते पुरुषस्याध्यात्मिककल्पनायाः भव्यं निद्दशंनमस्ति । पुरुषस्ास्य सहस्राणि शिरांसि, सहस्राणि अक्षीणि, तथैव पादाः च सन्ति । अर्थात् तस्मै पुरुषाय एतेषां शरीरावयवानां कापि इयत्ता नास्ति । अस्य विश्वस्य परिमाणादसावधिकोऽस्ति । विश्वमभितः स्थितस्य परिवे्टनात् दशाग्लियः अग्रतरोऽस्ति । "अत्यतिष्टद् दशाद्ुलम्, अत्र दशाङ्गुलं केवलं परिमाणाधिक्यस्य उपलक्षणमात्रमेवास्ति । विश्वस्य समस्तमरणशीलप्राणिनः तस्य म = शलल्लरनमत ः वेदाः उपनिषदश्च पुरुषस्यैकचतुर्थारामात्रमेव सन्ति । तस्यामृतत्रिपादः अःभकारोऽवस्थितोऽस्ति । सः सर्वेषां शासको वर्तते । अस्य पुरुषस्य विषये विलक्षणं तथ्यमिदमेवाऽस्ति-- "पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ॥" ( मन्त्र० २ ) एक एवाऽसौ पुरुषः निखिले विश्वस्मिन् वर्तत, यः प्राचीनकाठे समुत्पन्नोऽभवत्, यः मविष्येऽपि समुत्पन्नो भविष्यति । सर्वेशवरवाद्स्यायं सिद्धान्तः पार्धात्यपण्डितानां मते आर्याणां प्रोढ-दार्शनिक-विचारधारायाः परिचायकोऽस्ति । सृष्याः

समुत्पादने यज्ञस्य कल्पना कीदशी जागरूका क्रिया चासीद्, तस्याः अपि परिचयः अस्मिन्नेव सूक्त वर्णितः। देवताः स्वयज्ञे पुरुषवलिं कृतवन्तः । तेन वलिना जगतः प्राणिनां समुत्पत्तिरभवत् । अस्मिन्नेव सूक्ते बराह्मण-षत्रिय-वैश्य-शूद्रादीनां समुत्पत्तिस्तस्य पुरुषस्य मुखाद्, वाहोः, ऊरोः, पव्यां कमशः जाता । ऋग्वेदस्य कस्याप्यन्यस्मिन् मन्त्र चतुर्णा वर्णानां चर्चा नाऽस्ति, येन प्रतीतो विद्यते, अस्मिन् समाजे तस्मिन्नेव युगे चतुर्णा वर्णानां कल्पना समुद्भूताः । एतेन प्रकारेण सुक्तमिदं वैदिकार्याणां सामाजिकाध्यात्मिक-धारणायाः परिचायकत्वेन नितान्तं महच्ूपरणमस्ति । दाकलूाखा इदानीम् ऋवेदस्य प्रचलिता संहितायाः शाकलशाखीया एव वर्तते । शाकलसंहितान्ते ऋक्परिरिष्टनाम्ना ष्रिशत्सूक्तानि स्वीकृतानि सन्ति। एतेषां मध्ये कानिचन नितान्तप्रख्यातानि अनेकधा चर्चितानि अपि च सूक्तानि भवन्ति। यथा- श्रीसुक्तम् (सूस. ११), रात्रिसूक्तम् (सू.स. २६), मेधासृक्तम्, रिवसङ्कल्पसृक्तम् । अस्य सूक्तस्य प्रत्यकं मत्रस्य चतुर्थचरणः 'तन्मे मनः िवसङ्कल्पमस्तु इति वाक्येन ह्म = शलल्लरनमत ः वेदाः उपनिषदश्च समाप्यते। वाष्कलशाखानुसारेण 'संज्ञानसृक्तम' अन्तिमं सूक्तमस्ति ऋण्वेदस्य। पुराणेषु वेदिकमन्त्रष्या समुद्धताः सन्ति ऋगवशिष्टस्य मत्राः । श्रीसूक्तस्य मन्ूहयम् - 'दिरण्यवर्णां हरिणीम् गन्धद्वारां दुराधर्षाम' पदमपुराणे समुद्ूतो स्तः ' सितासिते सरीते यत्र सङ्गते' इति च स्कन्दपुराणस्य काशीखण्डे तथा पद्मपुराणे, समुद्धूतोऽस्ति। दयोः स्थानयोः मन्त्रोऽयं प्रयागपरो वर्तते। प्रयागे सिता=गङ्गा, तथा असिता- यमुना तयोः सङ्गमतीरथस्य विपुलमहत्वस्य प्रतिपादकः अस्ति एषः मत्रः। ऋगवशिष्टस्य मन्त्राः पुराणेषु प्रमाणाय समुदूताः भवन्ति, तेन एते मत्राः विदोषसम्मानयोग्याः भवन्ति। वाष्कलशाखा अद्यत्वे वाष्कलशाखायाः संहिता समुपलब्या न वतते तथाप्यस्याः विरिष्टतायाः वर्णनं विविधेषु स्थलेषु स्थाप्यते। शाकलशाखानुसारेण ऋग्वेदस्यान्तिमो मत्रः 'समानी व आकूतिः"अस्ति, किञ्च वाष्कलसंहितानुसारेण 'तच्छरेयोरावृणीमहे"इत्येव अन्तिमो मन्त्रोऽस्ति । अस्मादेव सूक्तात् वाष्कलशाखा- सम्मत संहितायाः सपूर्णो भवति। कुतश्चिदधिकाऽस्ति मत्राणां संख्याऽपि । शाकलशाखायां सप्तदशाधिकसहस्रसंख्यकानि सूक्तानि सन्ति। किञ्च वाष्कलशाखायां पञ्चविंशत्यधिकसहस्रसंख्यकानि सूक्तानि सन्ति। पूक्तेषु अष्टाधिकसुक्तेषु संज्ञानसूक्तमस्ति एकमेव। अयम् अस्याः संहितायाः अन्ते निवेशितो वरतते। अन्यानि सप्तसूक्तानि वाल्यखिल्यसूक्तभ्यः स्वीकृतानि भवन्ति। अतः तन्मण्डलस्थ समस्तसक्तानां संख्या नवनवतिर्भवति । "एतत् सहस्रं दश सप्त चैवाष्टवतो बाष्कलकेऽधिकानि । तान् पारेण शाकले दौशिरीये वदन्ति शिष्टानखिलेषु विप्रा ॥ च = ल्लवण ः वेदाः उपनिषदश्च आश्वलायनशाखा आश्वलायनसंहितायाः तथा तेषा ब्राह्मणानां कालः कस्मिंश्चित् समयेअवश्यमेव आसीत्। यतो हि कवीन्दराचार्यस्य (१७ इाताच्दाः) सूच्यामेतेषां ग्रन्थानां नामोेखः स्पष्टरूपेणोपलबव्धो भवति। सम्मति अस्याः शाखायाः गृह्यसतं श्रोतसूत्रमिति दो समुपलब्धो स्तः। शा्यायनशाखा शाखायाः अस्याः संहिता तु नोपलभ्यते । किञ्च ब्राह्मणारण्यको ग्रन्थो उपलभ्येते। अनेकेषां विचारकाणां मते शाद्घायनस्तथा कोषीतकि शाखा एकैवाऽस्ति, किञ्च द्वेऽपि शाखे भिन्ने एव स्तः । शाद्घायनीयसंहितायाः तथा शाकलशाखानुयायि-ऋक्संहितायाः अपि च मत्रसंहदितयोः भेदो न दृश्यते, = कमे एव विभिन्नता वत्ते केवलं मन्त्राणां । माण्डूकायनशाखा कका अस्याः अपि शाखायाः ग्रन्थाः अनुपलब्धाः सन्ति। यत्र तत्र समुद्धरणादेव अस्यास्तित्ववोधोवतंते । युवदस्य विभागः यजुर्वेदीयारण्यकम् तैत्तिरीयारण्यकम् यजुर्वेदे एतस्मिन् आरण्यके दक परिच्छेदाः अथवा प्रपाठकाः वर्तन्ते। एषः प्रपाठकः सामान्यतः "अरण' इति पदेन ज्ञायते। अस्य नामकरणम् अपि तेनैव कृतं विद्यते। यथा प्रथमस्य प्रपाठकस्य नाम ह्म = शलल्लरवनमत वेदाः उपनिषदश्च भवति- भद्रः दवितीयस्य- 'सहैव', तृतीयस्य "चितिः", चतुर्थस्य 'युञ्जते, पञ्चमस्य 'देव वै', षष्ठस्य 'परे', सप्तमस्य शिक्षा, अष्टमस्य- त्रह्मविद्या, नवमस्य 'भृगुः', दकामस्य 'नारायणीयः' इति। अस्मिन् सप्तम- अष्टम-नवम प्रपाठकाः मिकित्वा तैत्तिरीयोपनिषदि ति कथ्यते। दामप्रपाठकोऽपि महानारायणीयोपनिषदिति नाम्ना प्रसिद्धमस्ति। एषः प्रपाठकः आरण्यकस्य परिरि्टभागः विद्यते। प्रपाटकानां विभागः अनुवाकेषु कृतमस्ति। नवमप्रपाठकं यावत् अनुवाकसंख्या १०७ भवति। तैत्तिरीयव्राह्मणसद्दशम् अत्रापि प्रत्येकम् अनुवाके दशवाक्यानाम् एकः अङ्कः वर्तते। प्रत्येकं दकस्य अन्तिमं पदम् अनुवाकस्य अन्तिमे परिगणितम्भवति। अस्मिन आरण्यके ऋषान्त्राः समुदधूताः। प्रथमप्रपारकः आरुण-केतुनामकस्य अघने उपासनायाः तथा तदर्थम् इष्टिकाचयनं वर्णयति। द्वितीये अस्मिन् प्रपाठके स्वाध्यायस्य तथा पञ्महायज्ञानां विषये वर्णनं कृतमस्ति। अत्र गङ्गा-यमुनयोः मध्यदेशः पवित्रः, तथा मुनीनां वासाय उत्कृष्टा भूमिः कथिता भवति। तृतीयप्रपाठकः चातुर्ोतरचितेः उपयोगिनां मत्राणां सङ्कलनं भवति। चतुर्थाध्याये प्रव्ूवस्य उपयोगिनां मन्त्राणां विषये सङ्ग्रहः वर्तते। अत्र कुरुक्षेत्रस्य खाण्डवस्य च वर्णनं भोगोलिकस्थितेः अनुसारेण एवाऽस्ति। अस्मिन् प्रपाठके अभिचारमन्त्राणामपि सत्ता दृश्यते। आभिचारिकमन्ूाणं प्रयोगः शत्रूणां विनाशाय क्रियते। ४।२० मन्त्रे तथा ४। ३० मने छिन्धी मिन्धी हन्धी कट' एवंविधानां मत्राणां स्पष्टरूपेणात्र संकेतो टृश्यते। ४।३८ मत्रे अथर्ववेदस्य आभिचारिकमत्रं प्रति स्पष्टरूपेण सङ्केतः लभ्यते। पञ्चमे प्रपाठके यज्ञीयानां सङ्कतानाम् उपलब्धः वर्तते। षष्टे प्रपाठके पितुमेधसम्बन्धिनां मत्राणां विषये उदेखः प्राप्यते। सप्तम-अष्टम-नवमप्रपाठकेषु तैत्तिरीयोपनिषदस्ति। अस्मिन् दामे प्रपाठके नारायणीयोपनिषदस्ति। अस्य प्रपाठकसंख्याऽपि निर्दि नास्ति। अस्मिन् आरण्यके विभिनेषु स्थानेषु कतिपयाः विरिष्टः वार्ताः अपि दृइयन्ते। मु = शलल्लरनमत ः वेदाः उपनिषदश्च मेन्त्रायणीयारण्यकम् मैत्रायणीसंहिता कृष्णयजुर्वेदस्य अन्यतमा संहिता। इयं संहिता ग्य-पद्यात्मिकाऽस्ति । अस्यां संहितायां चत्वारः काण्डाः सन्ति । प्रथमकाण्डः (आदिमः) एकाद्शप्रपाटकेषु विभक्तोऽस्ति । येषु

करमशः दुशंपूणमास-अध्वर-अभधान-पुनराधान-चातुरमास्य-वाजपेयप्रभृतीनां यज्ञानां वर्णनमस्ति । द्वितीयः काण्डः (मध्यमः) त्रयोदशप्रपाठकेषु विभक्तः भवति। एतेषु प्रपाटकेषु काम्य-इष्टि-राजसूय- अग्निचितिप्रभृतीनां यज्ञानां विस्तृतविवरणमस्ति । तृतीयकाण्डे (उपरि) षोडशाप्रपाटकाः सन्ति । येषु अम्ि‌चिति-अध्वरविधि-सोत्रामणी-अश्वमेधादीनां विस्तृतं वर्णनं वर्तते। चतुर्थकाण्डः खिलकाण्डनाम्ना विख्यातोऽस्ति । एतेषु प्रपाटकेषु पूवनिरदछराजसूयादीनां यज्ञानां विषये अःभवश्यकवस्तूनां सुमहानां सद्गहो वर्तते । समग्रसंहितायां २१४४ मन्ुाः सन्ति, येषु १७०१ ऋचः प्रतिकाण्डम् ऋम्वेदात् समुदूताः सन्ति । एते सर्वेऽपि मत्राः ऋग्वेदस्य विभिन्नमण्डलेषु समुपलब्धाः विद्यन्ते । वाजसनेयि प्रातिशाख्यम् मुनिना कात्यायनेन विरचितं शुह्लयलुर्वेदस्य प्रातिशाख्य विद्यते । एषः कात्या यनोऽ्टाघ्यायीवातिककाराद्भिनो वा - इत्यस्मिन् विपयेऽधुनापि मतवादः प्रचलति । अस्मिन विषये आचार्यपादानामस्मदुपरमगुरूणां श्रीमतां बलदेवोपाध्यायानां सुस्पष्टमस्ति यत-इमे प्रातिशाख्यकर्तारः कात्यायना वातिकाराद्भिनाः सन्तीति नास्त्य सन्देहावसरः, इमे तु महर्षः पाणिनेरपि प्राचीनतराः सन्ति। अस्मिन् प्रातिशाख्ये अष्टावध्याया गुम्फिताः सन्ति । येषु परिभाषा-स्वर संस्काराणां त्रयाणां विषयाणां विस्तृत सर्वाङ्गीणं विवेचनमस्ति । ह्म = शलल्लरनमत वेदाः उपनिषदश्च तत्र प्रथमेऽध्याये-वर्णोत्पत्ति-अध्ययन विधि-संजापरिभाषा-वर्णानामुचारणस्था नादीनां वर्णनं विद्यते । दवितीयेऽध्याये-स्वर-नियमाः । तृतीयेऽध्याये सन्धेनियमाः । चतुरथेऽध्याये-सन्धेः, पदपाठस्य क्रमपाटस्य चापेक्षिता नियमाः क्रमशः प्रति पादिताः सन्ति । पञ्चमेऽध्याये--अवग्रहनियमाः । समासे योः पदयोः पृथग् ग्रहणमवग्रह उच्यते, यो हि हस्वस्य स्वरस्येवंकमात्रिको विद्यते । पषठाध्याये-आख्यातस्योपसर्गस्य च नियमाः । सप्तमेऽध्यायेपरिग्रहस्य नियमाः। परिग्रहस्यार्थो वि्यतेमध्ये इति शब्द् स्थापयित्वा पदस्य पुनरावर्तनम्। अष्टमेऽध्याये-वर्णसमाभ्नायस्य विस्तृत विवेचनम् । तत्र वर्णमाला-अध्ययन विधिः, वर्णानां देवता, पद्- चतुषटयन्तेपाञ्च गोत्र-देवतादीनां प्रख्यापनम् । तैत्तरीयप्रातिशाख्या तैत्तिरीयसंहितया सम्बद्धमिदं प्रातिशाख्यं परश्रद्ये खण्डद्वये विभक्तमस्ति । प्रत्येकस्मिन् प्श द्वादशा अध्यायाः सन्ति । इत्थं सूत्रात्मकोऽयं ग्रन्थ चतुर्वशात्यध्यायेषु विभक्तोऽस्ति । विषयाणां प्रतिपादनं सुव्यवस्थितं प्रामाणिकञ्च विद्यते। तत्र प्रथमे प्रश्न-वर्णसमाभ्नायस्य, श्द्स्थानस्य शब्दोत्तिप्रकारस्य, विविध स्वर-विसर्गसन्धीनां, मैून्यविधानादिविषयाणां सुस्पष्ट विवेचनमस्ति । ह्म = ललल्म श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च द्वितीये प्रच, नकारस्य णत्वविधानस्य, अनुस्वारस्य-अनुनासिकस्य, अनु नासिकभेद्स्य, स्वरितभेदस्य, संहिता-स्वरूपादेरनेकोपादेयविषयाणाञ्च प्रतिपादनमत्र विद्यते । स्वसंहितया सम्बद्धत्वात् सम्पर्णन्युदाहरणानि तेत्ि‌रीयसंहितागतान्येव सन्ति । अस्य भूचस्यो व्याख्यासम्पद्ः सन्ति । प्रकाशितासु तिसृषु व्याख्यासु मादिषेयकृत 'पदक्रमसदन'नामकं भाष्यमतीव प्राचीनतमं विद्यते । यतो ह्यस्य द्वितीयेन व्याख्या कारेण 'सोमयार्य' इत्याख्येन स्वत्रिमाष्य रे माहिषय-आत्रेय-वररुचीनां प्राचीनाना व्याख्यानामुपयोगः कृतः । तासु व्याख्यासु -मादिषेयभाष्यमिदं सर्वप्रथमं स्थान धारयति । तस्मिन् निर्दिष्टानि समस्तान्युदधरणानि अत्रोपलभ्यन्ते । "पद्करमसद्र अन्वर्थकमिदं नाम । ... वेदविदां मतेन वेदिकपाटस्य दधौ मेदौ भवतः, प्रथमः प्रकृतपाठः द्वितीयश्च विकृति पाठः । तत्र प्रथमे प्रकृतपाठे संहिता-पद्क्रमपाटाश्च विद्यन्ते । तथा च शिखा-माला घनादयष्ट विकृतिपाठा विद्यन्ते । एषु प्रातिशाख्यानां प्रतिपाद्यो विषयः प्रकृतिपाठ स्तथा तत्सम्बद्धं स्वरसन्धिविवेचनं विद्यते । अनया दृष्टया माहिषेव भाष्यस्य "पदक्रम सद्र' इति नाम सार्थकमस्ति । भाष्यमिदं संक्षिप्तं लघुकायमुपादेयञ्चास्ति । सोम यार्यस्य प्रिभाष्यरलम स्मादुर्वाचीनमस्ति । गोपालयज्वाविरचितं वेदिकाभरणन्तु अनयोयोरपेक्षया रचनाकाठद्द्टया नवीनमस्ति । एतास्तिख व्याख्याः प्रामाणिकाः प्रमेयबहुला, व्याकरणस्यान्तस्तत्ुवसमुद्धाटका नितरामुपयोगिन्यश्च विद्यन्ते । गृह्यसत्राणि गृह्यसूत्र कल्पस्य अङ्गम् भवति। अनेके रन्थकर्तारः आश्वलायनगृह्यसत्र कारिकावद्धं कृतवन्तः। तेषु ठेखकेषु रघुनाथदीक्षितगोपालकुमारिलम्रमृतीनां विदुषां नाम ुविदोषरूपेण उद्लेखनीयमस्ति। अन्तिमलेखकेन आश्वलायनगयसूत्रस्य नारायणवत्तेस्तथाऽनन्तस्वामिनो निर्दशं कृतवान् स्वकीये यन्थे। ह्म = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च गृह्यसूत्र व तदीये आश्वलायन शाङ्गायनं च वर्तते। शुद्छयजुवेद्स्य श्रोतसूत्रमेकमेव कात्यायनश्रोतसूत्रमस्ति । गृह्यसत्रचच अस्यैकमेव पारस्करगृद्यसूत्र विद्यते । कृष्णयलुरेद्सम्बद्धानि श्रोतसूत्राणि-बोधायन- आपस्तम्बहिरण्यकेशि-वैखानस-भारद्याज-मानवनामधेयानि सन्ति । एतस्मिन् वेदे बोधायनं गृयसूत्रमपि सुखुभमस्ति । सामवेदीयकल्पसुतरषु अःर्षेयं कल्पसूत्र प्राचीनम् । एतत् साखायनात् श्रोतसूत्रादपि प्राचीनतरमिति निगद्यते । वेदस्यास्य मुख्यं गृह्यसूत्र कोथुमशाखीयं गोभिलगृद्यसत्रं सुविदितम् । अथर्ववेदस्य श्रौतसूत्र वैताननामकं वं तदीयं गृह्यसूत्र कौशिकसंज्ञकं वयम् । गृह्यसूत्रमिदं प्राचीनभारतीययातुविद्याविषयकामनुपमाञ्च सामग्रीं प्रस्तौति । शाद्वायनगृह्यसूतरे षडध्यायाः सन्ति । विषयोऽपि तदेवास्ति - संस्काराणां वर्णनं, तथा तत्सम्बद्धानां गृहनिर्माण-गृहपरवेशादीनां विषयाणां स्थाने स्थाने च वर्णनमस्ति । ऋवेदस्य तृतीया शाखा- 'कौषीतकि' इत्येतस्य कल्पसूत्राणामपि परिचयः सम्प्रति उपलभ्यते । धारणेयं प्रायः प्रचलिताऽस्ति यत्, शाह्गायन- कौषीतकि-उभयोरपि एकस्येव शाखान्तर्गते भिन्न-मिन्नमभिधानमस्ति । एं कोषीतकिशाखा शाद्धायनशाखातः सर्वथा भिन्ना एवास्ति । कौषीतकिगृद्यसत्रं सम्प्रति मद्रासनगरीतः प्रकादितमभवत् । शह्लयजुर्वदीयग्यसत्राणि पारस्करगृद्यसूत्रनाभ्ना शुङछयजुर्वदस्य गृद्यसूत्रं विख्यातमस्ति । अस्य त्रिषु कण्डेषु प्रथमकाण्डे आवसथ्याभ्नेराधानं, विवाहादारभ्यज्ञ्प्राशनपर्यन्तानां विषयाणां वर्णनमस्ति । दितीयकाण्डे चूडाकरणादारभ्य उपनयन-

समावतंन-पन्चमहायज्ञ-श्रवणाकर्म-सीतादियज्ञानां विवरणमस्ति । अन्तिमे काण्डे श्राद्ान्तरे अवकीर्णि प्ायश्चित्तादीनां विविधानां विषयाणां प्रतिपादनमस्ति । ह्य = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च कृष्णयदुदीयगृह्यसूत्राणि बोधायनगृह्यसूत्तम् गृह्यसूत्रमिदं बोधायनकल्पसत्रस्यैको विरिष्टंडोऽस्ति । १९२० खीष्टब्दे गवर्नमेण्ट-ओरियन्टल- लाइवेरी-सीरीज-मेसूरनगरीतः प्रकाशितं बमूव । ग्रन्थोऽयं गृद्यशेष-पितृमेधसत्रेः सह समन्वितोऽस्ति । अस्मिन् चत्वारः प्रश्नाः सन्ति । इतरहस्तलेखेष्वस्य दशा प्रश्ाः (अध्यायाः) उपलब्धाः सन्ति । ग्रन्थेऽस्मिन् बहुविधस्य परिवर्तनस्य परिवर्धनस्य च सङ्कृतो लमते। भारद्वाजगृह्यसूतम् भारद्ाजश्रोतसुत्रस्येव एतत् अंशत्वेन तिष्ठति। सूत्रेऽस्मिन् त्रयोऽ्शाः सन्ति। अस्य प्रकाशनं लाइडेन इत्यस्य ड. सारोमन्स-महोदयेन कृतम्। सम्पादकमहोदयेन अस्य परिवर्धनस्य विषये यदभिमतं प्रकाशितं तत्तु न स्वीकृतम्। विवाहप्रकरणे कतिचिदधिषयेषु अःशघुनिकतायाः सङ्केतो लभते । तेन दययमंशः क्षेपक इति स्वीकर्तुं न शकयते। आपस्तम्बगृहयसूरम् आपस्तम्बकल्पसूत्रस्य सप्तविंशतितमः प्रश्नः इदमेव गृद्यसूत्रमस्ति । अस्मिन् गृह्यसत्र त्रिंशत् प्राः सन्ति । गृह्यसूतरमिदं मन््पाटस्य मन्त्राणां निर्दशं करोति । हरदत्तस्य अनाकुलावृत्तिस्तथा सुदशंनाचार्यस्य तात्पर्यदशंनव्याख्यया सह चोखम्बा-सीरीजकाञ्ीतः ( १९२८ ई० ) प्रकारितमस्ति। सूत्रमिदम् अष्टपरलेषु विभक्तमस्ति । प्रत्येकस्य परटलस्याभ्यन्तरे खण्डानि सन्ति । खण्डेषु सूत्राणां स्थितिरस्ति । फलतः समस्तो ग्रन्थः सूत्रेषु विभक्तोऽस्ति । अस्य गृह्सूतरस्यापि विषयस्तथेवास्ति मु = शलल्लरनमत ः वेदाः उपनिषदश्च यथाऽन्यगृह्यसूत्रेपलब्धो विद्ते । अस्य द्वौ व्याख्याकारिणौ वर्तेते । हरदत्ताचारयः सुदर्शनाचारयंश्ेति । दरदत्ताचार्यस्य समयस्तु पञचदशाातकीयो वर्तते, कतिपयैरन्यप्रमाणैः विद्वानयं पञ्चद्शशतकात् प्राचीनतरो वर्तते इति पुरातत्त्वविदो वदन्ति । हरदत्तोऽयं दौवमतानुयायी, कावेरीतटवासी दाक्षिणात्यो विद्वानासीत् । अध्यपस्तम्बस्य गृह्यसूत्र, गृह्यमत्रः, धर्मसूत्र परिभाषप्रभूतिग्न्धानां व्याख्या एतेन विरचितेति । आश्वलायनगृह्यूत्रस्य 'अनाविला^-टीका तथा गोतमसूत्रस्य 'मिताक्षरा'-व्याख्या अनेनैव हरदत्ताचार्येण छिखितेति खीट्स्य सप्तदशाातकस्य पूर्वाद्धे रचितनिर्णयसिन्धो कमलाकरभदरेन नाम्रा निर्दिोऽयं सुदर्शनाचार्यः अवर्द्ाचीनोऽस्ति इति मन्यते। दिरण्यकेशिगृद्यसत्रम् दिरण्यकेशिगृह्यसूतरस्य अपरं नाम सत्याषादगृह्यसूत्रमस्ति । दिरण्यकेशिकल्पसूत्रस्य १९ तथा २० प्ररूपमस्ति । गृह्यानुठानेषु आवश्यकमत्राः समग्ररूपेणात्र प्रदत्ताः सन्ति । एतेषु मत्रेषु प्रयुक्ताः शब्दाः पाणिनीयव्याकरणेन सुसङ्गताः न सन्ति। अस्य ग्रन्थस्योपरि मातृदत्तस्य प्रोढा व्याख्याऽस्ति। टीकया सह मूलगन्थस्य सम्पादनं डो क्रस्ते-महोद्येन वियनानगरीतः (१८८९ ई.) कृतं प्रकाशितश्चेति । आङ्ग्लानुवादेन सह 'सेकरेड बुक्स आफ द् ईस्ट, ग्रन्थमालायाः मोल्डनवर्गेण सूत्रमिदं परकाशितमस्ति । वैखानसगृह्यसूतम् तेत्तिरीयशाखातः सम्बद्धमिदं गृह्यूत्रम् अवान्तरकालिकमिति मन्यते । एतत् सूत्रम् अनुषठानेषु योजनीयमत्राणां प्रतीकस्य एवोछेखं करोति । एतेषां मत्राणां स्वतन्् सङ्कलनं 'वैखानसीया मत्रसंहिता' इति नाम्ना कृतमस्ति । गुहयमन््संहितयोः पारस्परिकसम्बन्धविषये विद्वत्सु पेक्य नास्ति । कतिचिजनाः च = ललल्लम श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च मत्रसंहितां गृह्यात् प्राचीनतरं मन्यन्ते, चान्येऽर्वाचीना समकालिका वेति मन्यन्ते । डो कैठेण्डेन अस्य प्रकाङानमाङ्ग्कभाषानुवादेन सह कृतमिति । अभ्रिवेशगृहसूततम् अस्य गृह्यसत्रस्य रचयिता अभ्निवेशनामको वैदिकाचार्योऽस्ति । अयमेवाचार्: तैत्तिरीयाणां वाधूलशाखाऽन्तर्गते अभ्रिवेशोपञ्ाखायाः प्रवर्तनंकृतवान् । अन्येभ्यः गृह्यसत्रेभयः अस्य वर्यविषयस्तथा रचनाकौडालं नितान्तं भिन्नं दृष्टिगोचरं विद्यते । अस्मिन् वर्णितानुषठानेषु नारायणवलि- यतिसंस्कार-संन्यासविधि-वानप्रस्थविधिप्रभूतीनामुपरि अवान्तरकालिकधार्मिकसम्मदायानां प्रभावः स्पष्टतः परिलक्षितो विद्यते । फलतः सामान्यगृद्यसत्ेभ्यः अस्य दिया भिन्ना एवेति । ग्रन्थोऽयं अनन्तशयन- संस्कृतग्रन्थमाला, तरिवेन्द्रम-नगरीतः प्रकाशितोऽभवत् । मानवगृद्यसूत्रम् अस्यापरं नाम मेत्रायणीयमानवगृयमपि भवति । मत्रायणीयश्ाखायाः चरणव्यूहे निर्दिशः भेदाः - मानव-वराह-दुनदुभ-छागलेय-हारि्रवेय-श्यामानीयानां ‘‘मानवः' अन्यतमो विभेद्ः भवति । अस्मिन् गृह्यसूत्र दौ पुरुषो वा प्रकरणौ वर्तते । प्रत्येकस्मिन् पुरुषे अनेकाः कण्डिकाः सन्ति । अस्मिन् ग्रन्थे विनायकपूजायाः विोषवर्णनमस्ति । अष्टावक्रस्य भाष्येण साकं वडोद्रा-नगरीतः प्रकारितोऽयमस्ति । भाष्यकारः अस्य रचयितुर्नाम ‘‘मानवाचार्य' इति वदति । एतस्य व्यक्तित्वविषये अ्पज्ञानमेवास्ति । म = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च वाराहगृह्यसूत्रम् मेत्रायणीशाखायां गृद्यसूत्रमेतत् मेत्रायणीसंहितायाः मन्त्राणां प्रयोगं करोति। अस्य बहनि सूत्राणि काठकगृह्यसूत्रमिव तथा मानवगृद्यसूत्रमिव सन्ति । गृद्योपयोगिनीनां विरिष्टवस्तूनामभावादेवायं ग्रन्थः तद्रन्महच््पर्णः नास्ति । काठकगृह्यसूततम् काठकगृह्यसत्रमपि मानवगृद्यसूत्रात् प्राप्यते । अस्यैव नामान्तरं"लोगाक्षिगृयसूत्रम' भवति। अस्य ग्रन्थस्य द्धौ प्रकारको विभागो वर्तेते। प्रथमविभागानुसारेण म्न्थेऽस्मिन् ५३ कण्डिकाः सन्ति। द्वितीयविभागानुसारेण अस्मिन् भागे पचचाध्यायाः सन्ति। अनेनैव पञ्चाध्यायीविभागेनास्य लोकप्रियो नाम 'गृह्यपञ्चका" वर्तते । अस्य त्रिषु टीकाकारेषु आदित्यदर्चनः प्राचीनतमः भवति । माधवाचार्यस्य पुत्रो ब्राह्मणवलस्य व्याख्या टीका न भूत्वा अधिकांशतः पद्धतिरेवास्ति । हरिपालस्य पुत्रस्य देवपालस्य टीका भाष्यनाम्ना ख्याताऽस्ति । १९८१ विकरमादे त्रिभिः व्यख्याभिः संवलितं सुषसंस्करणं केलेण्ड-महोदयेन लाहौरनगरीतः प्रकाशितम् । श्रक्ष्णयसुर्वदस्य शाखा शुङ्कयलुर्वद्स्य माध्यन्दिनशाखा, काण्वशाखा चेति दवे शाखे स्तः। प्रथमा उत्तरभारते

प्राप्यते द्वितीया अपि च महाराषट्। अनयोः शाखयोः संहिते भिन्ने सत्यौ अपि स्वल्पमेव भेदं ते धारयतः, बहुत्र अपि च साम्यम् अस्ति। किञ्च प्राचीनकाले काण्वशाखा उत्तरभारते एवासीत्। यतः अस्याः संहितायाः एकस्मिन् मन्त्रे (११/१९) कुरु-पाच्चाख्देशीयनृपतेः निर्देशः प्राप्यते (एष वः कुरवो राजा, एष पाञ्चालो च = ललतम श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च राजा)। महाभारतस्य आदिपर्वानुसारेण (६२/१८) शकुन्तलायाः पालनकरतुः पितुः कुखपतिकण्वस्य आश्रमः मालिनीनयाः तटे आसीत्। अद्यापि इदम् स्थानम् उत्तरप्रदेशस्य 'विजनोर 'मण्डठे 'मालन' नाम्ना ख्याता एका लघ्वी नदी अस्ति। अतः काण्वसंहितायाः प्राचीनसम्बन्धः उत्तरपरदोन सह अङ्गीकरणे न कापि विप्रातपत्तः। कृष्णयजुर्वेदस्य शाखा कृष्णयुर्वेदस्य सम्प्रति चतस्रः शाखाः प्राप्यन्ते - तैत्तिरीयसंहिता- इयं प्रधानशाखा, अत्र सप्तखण्डाः सन्ति। ते अपि च खण्डाः अष्टकशब्देनकाण्डराब्देन अपि च व्यवहियन्ते। प्रतिकाण्डं कतिपयाध्यायाः वर्तन्ते ये प्रपाठकनाम्ना ख्याताः। इमेप्पाठकाः बहुषु अनुवाक्ष विभक्ताः सन्ति। मैत्रायणीसंहिता इमे द्वे अपि संहिते तेत्तिरीयसंहिताम् अनुकुरुतः। काठकसंहिता केवलं कमे यत्र त्र पार्थक्यं वर्तते। कापिष्ठलसंहिता चरणव्यूहमतानुसारेण अस्याः विषये प्रतिपाद्यिष्यते। ह्म = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च तैत्तिरीयसंहिता तैत्तिरीयसंहितायाः प्रसारदेशः दक्षिणभारतेऽस्ति। आंदिकरूपेण महाराषटरमदेशीयाः समग्ररूपेण अपि च अन्धरद्रविडदेश्षीयाः अस्याः शाखायाः अनुयायिनः सन्ति। अस्याः संहितायाः स्वकीयाः ब्राह्मण- आरण्यक -उपनिषत्-श्रोतसूत्र-गृयसतरप्रमृतयः अशषुण्णाः सन्ति। तेत्तिरीयसंहितायाः परिमाणमपि न्यूनं नास्ति। आचार्यसायणस्य इयं स्वकीया शाखासीत्। शुछयजुर्वेदे वर्णितविषयाः इव अस्याः विषयाः सन्ति। पौरोडाश-याजमान वाजपेय-राजसुयपरभृतिनानायागानुष्ठानानां विदं वर्णनम् अत्राप्यस्ति। यज्ञस्य मुख्यस्वरूपस्य निष्पादकत्वेन अस्याः संहितायाः विदरत्तापर्णभाष्यं सर्वप्रथमम् आचार्यसायणेन रचितम्। किञ्च तस्मादपि पूर्वतरं भाष्यं भट्रभास्करमिश्रस्य (एकादश्शतान्याः) समुपलब्ध वर्तते। ज्ञानयज्ञनाभ्ना भाष्यमिदं विख्यातमस्ति। प्रामाणिकद्दष्या विदत्ताद्द्या वा कस्मादपि भाष्याद् हीनतरमिदं भाष्यं नास्ति। अधियज्ञ्थाद् अतिरिक्त आध्यात्मिकाधिदेविकपक्षयोरपि मन्त्राणामधा यत्र तत्र कृताऽस्ति। मैत्रायणीसंहिता कृष्णयजुर्वेदस्य अन्यतमा शाखा मेत्रायणी। इयं अपि च संहिता ग्यपद्ात्मिकाऽस्ति । अस्यां संहितायां चत्वारः काण्डाः सन्ति। प्रथमकाण्डः एकादराप्रपाटकेषु विभक्तोऽस्ति । येषु कमरः दरशपूर्णमास-अध्वर-आधान-पुनराधान-चातुमास्य वाजपेयप्रभृतीनां यज्ञानां वर्णनमस्ति। द्वितीयः काण्डः त्रयोदशप्रपाठकेषु विभक्तः अस्ति। एतेषु प्रपाठकेषु काम्य-इष्टि-राजसूय-अभ्निचितिप्रभृतीनां विस्तृतं विवरणमस्ति। तृतीयकाण्डे षोडराप्रपाठकाः सन्ति। येषु अग्निचिति-अध्वरविधि-सोत्रामणी-अश्वमेधादीनां विस्तृतं वर्णनमस्ति। चतुर्थकाण्डः खिलकाण्डनाम्ना विख्यातोऽस्ति। एतेषु पूर्वनिरदएराजसुयादियज्ञानां विषये आवश्यकवस्तूनां सुमहान सद्ग्रहो वरतते। समग्रसंहितायां २१४४ मन्त्राः सन्त, येषु १७०१ ऋचः मु = शल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च प्रतिकाण्डम् ऋग्वेदात् समुद्ूताः सन्ति। एते सर्वेऽपि मन्त्राः ऋग्वेदस्य विभिन्नमण्डलेषु समुपलब्धाः भवन्ति । कठसंहिता यजुर्वेदस्य सप्तविंशतिशाखासु कटशाखा अन्यतमा। पुराणेषु काठकजनाः मध्यप्रदेशीयनाम्ना माध्यमनाम्ना वा विख्याताः आसन। अनेन ज्ञायते यत् ते प्राचीनकाले मध्यप्देहो वसन्ति स्म। पतञ्जलेः कथानुसारं कठसंहितायाः प्रसारः तथा पठन-पाठनं प्रतिग्रामम् आसीत् (पामे ग्रामे काठकं कालापकं अपि च प्रोच्यते महाभाष्यम् ४/३/१०१)। अनेन अस्याः संहितायाः प्राचीनकाले विपुरप्रचारस्य बोधो वरतते। अधुना अस्याः अध्येतृतृणां संख्या अतीव अल्पा। कठसंहितायां पञ्च खण्डाः सन्ति। ते अपि च करमशः इदिमिका-माध्यमिका-ओरमिका- याज्यानुवाक्या-अश्वमेधादयनुवचननामभिः ख्याताः सन्ति। एतेषां खण्डानाम् अंशस्य नाम स्थानकमस्ति । एतानि नामानि वैदिकसाहित्येऽन्यत् दुर्कमानि सन्ति। अस्यां संहितायां स्थानकस्यसंख्या चत्वारिशत, अनुवचनानां संख्या त्रयोदङा, अनुवाकानां संख्या त्रयश्चत्वारिशदधिकाष्टशतम्, मन्त्राणां संख्या एकनवत्यधिकत्रिसहस्रम्, मन्त्रब्ाह्मणयोः सम्मिलिता संख्या अष्टाद्शसहस्रपरिमिता। कापिष्ठलसंहिता चरणव्यूहस्य मतानुसारेण चरकशाखान्तर्गते कठानां, प्राच्यकटठानां कपिष्ठरकटानाच्च उछेखः प्राप्यते, येन उछेखेन शाखासम्बद्धस्य अस्य पूर्णपरिचयो वर्तते। कपिष्ठलः कस्यचित् ऋषिविरोषस्य नाम आसीत्। अस्य उदेखम् महावैयाकरणपाणिनिमहर्षिः 'कपिष्ठलो गोत्रे (८/२/९१) इत्येतस्मिन् सूत्र ह्म = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च कृतवान्। भाष्यकारेण दुर्गाचार्येणापि स्वात्मानं 'कपिष्ठलो वारिष्ठः' इति उक्तम् ("अहञ्च कापिष्ठलो वारिष्ठः" निरुक्तटीका ४/४)। प्रायः कस्यचित् स्थानविरोषस्य इदम् अभिधानम् आसीत्। अस्याः संहितायाः सम्पादकेन अनुमीयते यत्- कपिष्ठलग्रामस्य प्रतिनिधिः केथल' इत्याख्यो ग्राम एवासीत्। म्ामोऽयं कुरक्ेत्रे सरस्वतीनयाः पूर्वस्यां दिशि अवस्थितः आसीत्। अस्य ्रामस्योघ्ेखः कादिकायां तथा वराहमिहिरेण रचितायाम् वृहत्संहितायां (१४/४) प्राप्यते। काठकसंहितातः अनेकविधं वैमभिन्यं पार्थक्यञ्च अस्यां कापिष्ठलसंहितायां परिलक्षयते। काठकसंहितावत् मूलग्रन्थस्य समानत्वेऽपि अस्याः स्वराकनपद्धतिः ऋग्वेदसदशी। ऋग्वेद् इव ग्रन्थोऽयम् अष्ठकेषु अध्यायेषु अपि च विभक्तोऽस्ति । एवम् कापिष्ठलसंहितायाम् ऋण्वेदस्यैव महान् प्रभावः परिलक्ष्यते। ग्न्थोऽयम् अपूर्णः एवास्ति। यन्थेऽस्मिन् निम्नलिखितानि अष्टकानि तथा तदन्तर्गता अध्यायाश्च सन्ति बोधप्रश्नाः * शुह्यलेुद्स्य कति शाखाः। ◦ कृष्णयजुर्वेदस्य कति शाखाः प्राप्यन्ते। ◦ माध्यन्दिनशाखा कुत्र लभ्यते। ◦ कण्वशाखा कुतर

पराप्यते। * मेत्रायणीसंहितायां कति काण्डाः सन्ति। ह्य = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च सामवेद्ः, अथर्ववेद्ः- खण्डः-2 (मन्ाः- आरण्यकम् प्रातिशाख्यम् गृह्यसूत्रम- राखाः) प्रस्तावनां सामवेद् इत्यत्र गीतिरूपा मनाः विद्यन्ते। अत एव सः उपासनाकाण्डपरो वेदः इति गीयते। यज्ञे चत्वारो ऋत्विजो सन्ति होता, अध्वर्युः, उद्राता, बह्मा, दोता-आह्ानकर्त, स हि यज्ञावसरे प्रकान्तदेवतानां परहांसाय रचितान् मन्त्रान् उचरयन् देवताः आहयति, तत्कार्याय सङ्कलिता मन्त्राः स्तुतिरूपतया ऋचः समाख्याताः, तेषां संग्रह एव ऋग्वेदः। अध्वुर्विधिवयज्ञं सम्पादयति, तत्रावशयकमन्ा यजूषि, तत्संग्रहो यजुरवद्ः उद्राता उचस्वरेण गानकर्ता, स हि स्वरवदधान् मन्त्रान् उचर्गायिति, तदपेक्षितमन्त्रसंग्रहः सामवेद्ः। ब्रह्मा यज्ञनिरीक्षकः कृताकृत्ेक्षणकर्मा, स हि सर्वविधमन्त्रज्ञः तदपेक्षितो मन्ारिरथर्ववेद् इति उच्यते। उदेश्यानि » सामवेदस्य आरण्यकाणि कानि इति ज्ञानं जायते। ◦ अथर्ववेदस्य आरण्यकाणि कानि इति ज्ञानं जायते। * सामवेदस्य प्रातिशाख्यानि कानि इति ज्ञानं जायते। ◦ अथर्ववेदस्य प्रातिशाख्यानि कानि इति ज्ञानं जायते। ◦ गृह्यसूत्रविषये ज्ञानं प्रभविष्यति। ह्य = शलल्लरनमत 1 1 (3 ~ 3 श्वमहाविद्यालयः वेदाः उपनिषदश्च सामवेदस्य विभागः सामवेदीयारण्यकम् सामवेदेन सहसम्बद्धम्आरण्यकंतवलकाराररण्यकमितिनाम्नाज्ञायते। 'एतदेवआरण्यकं 'जैमिनीयोपनिषद्राह्मणमितिउच्यते। अस्यचत्वारोऽध्यायाःसन्ति। प्त्येकस्मिन्अध्यायेअनुवाकाःभवन्ति। चतुर्थाध्यायस्यदङामानुवाकेपरसिद्धःतवलकारः किंवाकेनोपनिषदस्ति। अथर्ववेदस्यआरण्यकम्नोपलभ्यते। एतेन वेदेन सहसम्बद्धाःयाउपनिषदःवरतन्ते, ताःकस्यापिआरण्यकस्य भागो न भूत्वाआरम्भादेवस्वतन्ग्रन्थरूपेणविदयमानाःसन्ति। सामवेदपातिशाख्यम् विद्वांसः समीक्षकाः कथयन्ति यत्-सामवेद्स्यानेकानि प्रातिश्ाख्यानि प्रकाशि तानि सन्ति , तेष्वेतानि मुख्यानि सन्ति । पुष्मसूत्रम् ऋषिणा पुष्पेण प्रणीतत्वादिद प्रातिशाख्य पुष्पसूत्रमिति नाम्नाऽभिधीयते । अस्मिन् दश प्रपाठकाः सन्ति । अस्योपरि उपाध्यायस्याजातरात्रोः कतं भाष्यं प्रकाशितमस्ति । प्रस्तुतमिदं प्रातिशाख्य गानसंहितया सम्बन्धितमस्त्यत एवास्मिन् स्तोमस्य बहुलांेन विवेचनमस्ति । अपि च तादृशानां स्थलविषाणां मन्ाणाञ्चोलेखाः सन्ति, येषु स्तोभानां विधानमपवादो अस्ति । सद्गीतोपयोगि सामग्रीणां सङ्कलनेन स् तमिदं नितरामुपयोगितां विति । अस्मिश्च मुख्य रूपेण वेय गाने अरण्ये गेयगाने च प्रयुक्तानां साम्नामृहह मन्त्रेषु कथं केन वा रूपेण भवती त्यस्य विशदं विवेचनमस्ति । ह्म लललम ॥ 1 (3 ~ 3 रा श्वमहाविद्यालयः वेदाः उपनिषदश्च हरदत्तरभितायाः सामवेदीयसर्वानुकमण्याः आधारमाधृत्य पुष्पसुत्रस्य फु सूत्रस्य वा रचयिता सूत्रकारो वररुचिः । अस्य पुष्पसूत्रस्योपरि उपाध्यायस्याजात शत्रो मकस्य कस्यापि ग्रन्थकारस्य व्याख्या उपलभ्यते । ऋक्तन्त्रम् पुस्तकमिदं सामवेदस्य कौथुमशाखायाः प्रातिशाख्यमस्ति । अस्मिश्ान्यप्रातिशाख्येषु वर्यविषयेस्सह एषां विषयाणामपि अतिशयेन साम्य मस्ति । मन्थस्य पुष्पिकायामिदं 'ऋक्तन्त्रव्याकरणम्' इति नाम्ना निरद्टमस्ति । असीयुततरद्धिशतसूतरषु पचचप्रपाठकेष्वध्यायेषु वा विभक्तमिदं ऋतनत्रम्। अस्य रचयितारः सन्ति सुप्रसिद्धा वैयाकरणाः शाकटायननामघेयाः । येषां निर्दशा यास्कस्य पाणिनेश्च मरन्थेषुपलभ्यते । अक्षरोदयज्ञानवेशिष्टयमत्र वणितमस्ति । तत्पश्चा व्याकरणस्य विशिष्टानां पारिभाषिकशब्दानां लक्षण निर्देशः प्राप्यते । वर्णाक्षराणामुचचारणस्थाननिरूपणानन्तरं सन्धेविवरणं वेशेन प्रतिपादितमस्ति । पदान्ताक्षराणां विविधपरिवर्तनानां निरूपणं सन्धेः प्रसङ्गे महत्वाधायकम्पादेय चास्ति । तदुदाहरणश्च यथा--अन्तिमनकारस्य विसर्जनीये परिवर्तनं यथा--कतून + अनु = ऋतुरनु, रेफविरिष्टशब्दानां विसर्गस्य रेफे परिवर्तनम् -- ातरभि, प्रातजपस्व इत्यादौ । इत्थमत्र व्याकरणस्य गूढतथ्यानां विवेचनमुपलभ्यते । अतो निश्चीयते यदिद प्रातिशाख्य स्वमूलस्वरूपे पाणिनेः पूर्वमासीदिति । तस्मात् परिभाषाविधाने सूत्राणां रचनाया यद्ष्टाध्याय्यामेतस्य विपुलः प्रमावो दृश्यते तदा नात्राश्र्यस्य् किमपि कारणमवरिष्टमस्ति । यास्केनापि एतस्य विशिष्टमतानां निर्देशो विदितः स्वमहनीये मन्थे । मु = शलल्लरनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च ऋक्तन्त्रव्याकरणस्य रचयितुर्विषये मतद्वयं विद्न्मण्डले विराजते। ततर प्रथमे पक्षे शाकटायनः, द्वितीये पक्षे च ' ओद् ्जिः' । अत्र विदुषां सम्मतं मतमस्ति यदेको व्यक्तिगतनाम्ना द्वितीयश्च गोत्रजनाम्नेति समन्वयः । अन्यच-गोभिल गृद्यसत्रस्य व्याख्यातुमदनारायणस्य 'राणायनीयानाम् ऋक्तचप्रसिद्धा विसर्जन यस्यामिनिष्ठानाख्या' इति कथनानुसारेण ऋक्तत्रस्य सम्बन्धो राणायनीयशाखया सह स्वीक्रियते । कथनस्यामिप्रायोऽयमत्र राणायनीयशाखान्विताया सामसंहिताया मूला धारं स्वीकृत्य ग्रन्थोऽयं ५ विनिर्मित इति। अस्यैव सक्षेपीकरणं कृत्वा केनाप्याचार्येण लघु ऋक्तन्त्रम् इति नाम्ना विरच्य प्रख्यायितम् । सामवेदीय-गृयसूत्राणि गोभिलगहयसत्रम् अस्य प्रकाडानमनेकेभ्यः स्थानेभ्योऽभवत् (क्राउएर १८८५-८६; विब्छि० ई० १८०१-७९; सत्यव्रतसामश्रमी १९०६) अन्यैः विषयैः सह पिण्डपितृयज्ञस्य वर्णनं करोतीदं सूत्रम् । गोभिलगृह्यसूतरस्य आङ्ग्लानुवादः 'सेकेड बुक अफ ईस्ट इत्याख्यसंस्थातः ओल्डेनवर्ग-महोदयेन कृतः । खादिरगृह्यसूत्रस्य आङ्ग्लानुवादः २९७ खण्डे प्रकाशितोऽभवत् । गृह्यसूत्रमिदं रुद्रस्कन्दस्य टीकया सह प्रकाशितमस्ति मेसूरनगरादिति । १९२२ खीष्टाब्दे डो० कैलेण्ड-महोदयेन लाहौरनगरात् जैमिनीयगृह्यसत्र प्रकाशितम् । त्रिषु प्रमुखसामवेदीयसत्रेषु गोभिलगृद्यसूत्रम अतिप्रख्यातमस्ति । वहुप्रचलितात् कोथुमशाखातः सम्बद्धमिदं सूत्रमतीव लोकप्रियमप्यस्ति । इदं मन्त्रनाह्मण-नामकात् सामवेदीयमन्त्रसब्रहात्मकगन्थाद् अनुष्ठानावसरे मन्त्राणामुद्धरणं ददाति, किञ्च प्रतीकरूपेणेव सामसंहितायां मन्त्रोऽपयदधूतोऽस्ति । च = शलल्लरनमत 1 1 (3 ~ 3 | "| श्वमहाविद्यालयः वेदाः

उपनिषदश्च खादिरगृद्सूत्म् सामवेदस्य राणायणीयश्चाखातः सम्बद्धं गृह्यगोभिलसुत्स्योपरि सर्वात्मनाऽऽधारितमस्ति । तस्यादेशो नियमश्च अत्र संक्षिप्तरूपेण प्रस्तुतोऽस्ति । फलतः सूत्रमिदं गोभिलगृह्यसूत्स्येव संकषिपतसंस्करणमस्ति । जैमिनीयगृद्यसूम् खण्डदधयेषु विभक्तमिदं सूत्रमस्ति । प्रथमखण्डे चतुर्विंशतिः कण्डिकाः सन्ति, दवितीयखण्डे नव कण्डिकाश्चेति । अस्य सुबोधिनी-टीका श्रीनिवासाध्वरीमहोदयेन कृता। अस्याः टीकायाः कतिपयानि महत्पूणोद्धरणानि मूलगन्थेन सह केलेण्डेन प्रकाशितानि सन्ति । बोधप्रश्नाः * गोभिलगृह्यसूतरं केन वेदेन सम्बन्धितः अस्ति? ◦ जेमिनीयगृद्यसत्र कति खण्डेषु विभक्तमस्ति? * जेमिनीयगृह्यसूत्रस्य प्रथमखण्डे कति कण्डिकाः सन्ति? म शलल्लरनमत 4 1 (3 ~ 3 | “| श्वमहाविद्यालयः वेदाः उपनिषदश्च अथर्ववेदस्य विभागः अथर्ववेदः अभिचारकरियायाः प्राधान्येन प्रतिपादकः अयं वेद्ः अथर्वनामकर्षिणा द्ृटः। वेदेष्वथर्वेदः अयमेकया भूयस्या विशिष्टतया सह् संवलितोऽस्ति। ऋष्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति। यदा हि ऋग्वेदाद्यखरयो वेदा आमुष्मिकं फलं प्रद्दति, तदाऽयं अथर्ववेद् िकमपि फलं प्रयच्छति। जीवनं सुखसमन्वितं कर्तु येषां साधनानामपेक्षा भवति, तेषां सिच्यर्थमम् इह वेदे विविधानामनुष्ठानानां विधानं विहितमस्ति। पतञ्जलिना यद्यप्यस्य वेदस्य नवशाखाः समृष्छिखताः, परमीदानीन्तु पैप्पलाद-शौनकसंज्ञके द्वे एव शाखे लभ्येते। प्रचकिता अथर्वसंहिता शोनकशाखान्तर्गता पैप्यलादश्ाखासंहिताऽपि च अनतिचिरेणेव मुद्रिते स्तः। अथर्ववेदे विंशतिकाण्डानि काण्डानि, एकत्रंशदधिकसक्तरातकानि सक्तानि, सप्तीत्यधिकोनत्रिंशत्शातमन्त्राः विद्यन्ते। तेषु मन्ेषु द्वादशातमन्त्राः ऋग्वेदेऽपि द्दरयन्ते। विंशतिकाण्डे १५३ सूक्तानि सन्ति, तेषु द्वादशसूक्तानि अतिरिच्य शोषाणि सर्वाण्यपि ऋवेद्स्य दहाममण्डले समुपलभ्यन्ते। भूरजपत्रषु शारदालिप्या लिखितस्य अथर्ववेदस्य पुरातनं पुस्तकं कार्मीरीयैः सम्पादितम् अस्ति। तद् अधुना स्ुविज्ञन सर्वकलाशालायाः यन्थसद्रहे अस्ति। अथ्ववेदीयप्रातिशाख्यम् वैदिकवाउ्ये ऽथर्ववेदूस्य प्रातिशाख्यदयं प्रख्यातमस्ति । तत्र प्रथमत्वेन चचिती शोनकीया चतुरध्यायिकाऽस्ति । पाश्चात्यविदुषा ड" दविटनीमहाशयेनेयं शोनकीया सानुवादा प्रकाशिता। च = ललततम > 1 (3 ~ 3 | “| श्वमहाविद्यालयः वेदाः उपनिषदश्च चतुरवध्यायेष विभक्तमिदं प्रातिशाख्यम् । दिटनीप्रकाशि ग्रन्थे शौनकस्य नामनिर्देशात् तन्नाम्नैव नामकरणमभत् । सत्यन्त्विद्मस्ति यत् नामटेखकयोर्मध्ये महदन्तरं भवति ।। समपूर्णानन्दसंस्कृतविश्वविद्याखये-- सरस्वतीभवने सुरक्षिते हस्तलेखे कौत्सव्याकरणमिति नाम्ना विज्ञापितमिदं प्रातिशाख्यम्न्थलेखकेन । तत्र् पुष्पिकायां भवतिइत्यथर्ववेदे कोत्सव्याकरणे चतुरध्यायिकायां ... "पाद् इति'। कोऽयं कौत्सः, महाभाष्यचचितः पाणिनेः रिष्यः उत अन्यः ? किं दवावप्यभिन्नावेवसमीक्षणमपेक्षते एष विषयः । अधर्ववेदपरातिशाख्येप्रातिशाख्यविषयका केचन ए विषयाः समाख्याताः सन्ति । सन्धेः, स्वरस्य पदपाटस्य च नियमा अत्र प्रदर्शिताः सन्ति । येषु स्वरवर्णन मधिकेन विस्तरेणास्ति । प्रातिशाख्यमिदं पारिभाषिकरशब्दानां तथा प्रयोगो न करोति यथाऽन्यप्राातिाख्येषु नियमत उपलब्धा भवन्ति । शछाकल्याचार्य परित्यज्य न केषामप्यन्येषामाचार्याणामुदेखोऽत्र मिलति । उभावपि अन्धो पारस्परिकसहयोगे नाथर्ववेदस्य समयान् विषयान् निरूपयतः स्फुटीकुरुतः । अथर्ववेदस्य शाखाः पस्पशाहिके “नवधाऽऽथवणो वेद्ः'इति लिखित्वा पतञ्जलिना अथर्ववेदस्य नवद्ाखाः कथिताः। पुराणानुसारेण वेदव्यासः यं रिष्यम् अथर्स्य अध्यापनम् अकारयत्, तस्य नाम सुमन्तुः इति आसीत्। मागवतेऽस्य च्चाऽस्ति ~ सुमन्तुः अभिचारमधानवेद्स्य मुख्यप्रचारकः आसीत्। तेन असौ 'दारुणमुनिः' इत्युपाधिना विभूषितः आसीत्। अथर्ववेदस्य शाखानां विस्तारः पुराणेषु वर्णितः अस्ति। किञ्च भागवते कवन्धस्य नाम निर्दिष्टं नास्ति। अस्मिन् पुराणे सुमन्तोः दौ शिष्यौ कथितौ पथ्यो वेददरश्चेति। विष्णुपुराणेऽपि शिष्यदवयस्य चर्चाऽस्ति। किन्तु वेदुदरशस्य स्थाने देवद" इति नाम अस्ति। ह्म शलल्लरतनमत श्रीचन्द्ररेखरेनद्रसरस्वतीविश्वमदहाविद्याल्यः वेदाः उपनिषदश्च अथर्वणमहानारायणोपनिषद् स्वात्मानं देवदस्ीं नाम्नाऽथर्वश्ाखया सह सम्बद्धं स्वीकरोति। अतः 'देवदर्शः' किंवा “देवदरशी' इति नाम अधिकं स्वीक्रियते। विष्णपुराणानुसारेण पथ्यस्य त्रयाणां शिष्याणां नाम क्रमशः जावालिः, कुमुदादिः, शौनकः चासीत्। वेददरशस्य चत्वारः रिष्या आसन्। ते च मोदः, ब्रह्मावलिः, पिप्पलाद्ः, शोष्कायणिः, अथवा शोक्छायनिः। एतेषु शोनकस्य शिष्यः वभ्रूस्तथा सैन्धवायनः कथितः। एभिः मुनिभिः अथर्ववेदस्य विोषप्रचारः सम्पन्नोऽभवत्। प्रपच्ह्दय-चरणव्यूह- सायणभाष्यादीनाम् उपोद्धातेषु यद्यपि शाखानां सह्या अभिन्ना, तथापि एतेषु नामसु महती भिन्नता दग्गोचरीभवति। निभ्नलिखितान्यभिधानानि सन्ति - (१) पियलाद्, ( २ ) स्तौदः, ( ३ ) मोदः, (४) शोनकीयः, (५) जाजलः, ( ६ ) जलद्ः, ( ७ ) ब्मविद्ः, (<) देवदरचः, ( ९ ) चारणवेद्यश्च। आसु अथर्ववेदस्य नवश्चाखासु सम्पति शोनकपिप्पलादसमाख्ये दरे एव शाखे प्रप्येते। पिप्पलादः पिप्पलाद्-मुनिरेको अध्यात्मवेत्ता अस्ति। स्वाध्यात्मविषयकसंशयनिवारणाभिप्रायेण सुकेशाभरदयाजादिषड् मुनीनां तस्य पार आगमनस्योलेखो लमते। तेन दत्तान्यत्तराण्यपि प्रश्नोपनिषदि सुरक्षितानि च सन्ति। पुरा अस्य संहितायाः विशिष्टः ख्यातिरासीत्। अस्य द्धौ ग्रन्थौ आस्ताम्। प्रपच्चहदयस्य कथनमस्ति यत् -- पिप्पलादश्ञाखायाः मन्त्रसंहिता विंशतिः काण्डेषु विभक्ताः सन्ति, तथा तस्याः ब्राह्मणे अष्टाऽध्यायाः सन्ति। पिप्पलादसंहितायाः एका प्रतिः शारदालिप्यां कदमीरे उपलब्धाऽभवत्। सा हस्तप्रतं कदमीरनृपतिना जर्मनविद्धाषे राथ-महोद्याय उपहारत्वेन प्रषिताऽभवत्। एकोऽधिकोनविंशातितमे खीष्टाब्दे तस्याः आलोकटेख्यं अमेरिकातः प्रकारितोऽभवत्। महाभाष्यानुसारेण- “शान्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरमिस्वन्तु नः' अथर्ववेदस्य प्रथमोऽयं मन्त्रोऽस्ति, किञ्च मु = शल्लरनमत 1 1 (3 ~ 3 | "| श्वमहाविद्यालयः वेदाः उपनिषदश्च सम्प्रिप्रचलितायां शोनकसंहितायां

